UNIVERSAL LIBRARY
OU_184441
UNIVERSAL LIBRARY

OUP—552—7-7-66—10,000

**OSMANIA UNIVERSITY LIBRARY**

Call No. S88 D96S Accession No. 621

Author Diskalkar, D. B.

Title Selections from Sanskrit Inscriptions. Pt. I - Text.

This book should be returned on or before the date last marked below.

# SELECTIONS

From

# Sanskrit Inscriptions.

## Part I-Text

BY

**D. B. Diskalkar** M. A.
Curator, Watson Museum, Rajkot.

with a preface
by

**Rao Bahadur H. Krishna Sastri**, B. A
Government Epigraphist for India.

**Price Re. 1.**

1925.

Printed at the Aryabhushan Press by Anant
Vinayak Patwardhan and Published by
D. B. Diskalkar at Rajkot.

**Dedicated**

**to the sacred memory**

**of**

**my parents.**

# PREFACE.

The importance of Epigraphy for building up the early history of India is unquestionable and can hardly be gainsaid. A good deal of the accurate information which we now possess in regard to ancient India is undoubtedly derived from the study of inscriptions but for which even the names of emperors like Samudragupta the great ' who conquered nearly all India and whose alliance extended from the Oxus to Ceylon " would have been cast into oblivion. The connected accounts of several periods in early Indian History which it has now become possible to write is the outcome of patient and minute study of inscriptions chiefly. So the value of these documents for the history of Ancient India is admitted by all but I doubt if it has been fully recognised generally although scholars like the late Professor Buhler emphasized it long ago. The discovery of authentic inscriptions of ascertainable age and origin like that of Harisheṇa or Vatsabhaṭṭi and the Girnār *praśasti* shows how hollow the old theory of Renaissance of Sanskrit literature was; for it proves beyond doubt that the Kāvya literature must have been in full swing not only in the Gupta epoch but even before the commencement of the Christian era.* The composition of such inscriptions presupposes the existence of some *Alaṅkāra-śāstra*. For instance the *praśasti* of Harisheṇa i. e., the Allahabad pillar inscription of Samudragupta is a birst class little Kāvya which is artistically finished in every respect and places its author, namely, Harisheṇa in line with Kālidāsa and Daṇḍin. Some of the poetic figures in this composition remind us of Subandhu and Bāṇa and in the choice of words it is, perhaps, unsurpassed ; for where do we find more concise and more graphic a picture than what it gives of the situation in which Samudragupta is ordained by his father to be his successor ? We are quite

* See also Prof. Hermann Jacobi on Cultural, Linguistic and Literary Historical gleanings from the Kautiliya; *Ind. Ant*, Vol LIII, pp. 128 to 146. In this contribution the Professor concludes that the 4th Century B.C. should belong to the Classical period, maturing to full development.

justified to remark like Buhler that the verse which describes this situation is one of the best productions which our Kavis have given us ' in the domain of miniature portraits. '

The Girnār inscription of the reign of Mahākshatrapa Rudradāman, which was probably written between 160 and 170 A. C., is a much older work and also written in the Kāvya style. It possesses all the chief characteristics of the *Vaidarbhî rîti* which Daṇḍin has laid down in his *Kâvyâdarśa* and are mentioned in Bharata's *Nâṭyaśâstra*. There is no use of multiplying examples. The fact is that the inscriptions which have been published so far supply material not only for building the history of Ancient India but for the history of Indian Kāvya or the artificial poetry of the court, nay, for all the departments of Indian Research. This being the case it behoves every Indologist to facilitate the study of inscriptions and popularise Epigraphy. Mr. Diskalkar, therefore, has done a highly useful work in bringing out this edition and placing the texts of some of the very important inscriptions before the public. They are no doubt all published and fully discussed already but the books which contain their accounts are rather costly and not easily accessible to general public. This compilation of Mr. Diskalkar will obviate such drawbacks and place the texts of very valuable documents within an easy reach of every student who would care to study them. His choice has been a very happy one for he has selected such of the inscriptions as are useful not only for the history of some of the old dynasties but for the study of the evolution of the Kāvya literature as well. In the present volume he gives the texts only adding references to the publications where they have already appeared. Their critical account he has reserved for the next volume he is preparing. I am sure his work will be of immense use to those for whom it is intended.

Fernhill, Nilgiris,<br>Dated 27th April 1925. }

*H. Krishna Sastri.*<br>Government Epigraphist for India.

# INTRODUCTION.

The proverbial lack of the historical sense in the ancient Hindu has no doubt considerably detracted from the value of such a splendid heritage as India possesses in the Sanskrit language and literature. The deficiency of material which can be arranged in a strictly chronological sequence is to some extent made up by contemporary records on stone and copper which have been discovered during the last few decades, not only in all parts of the Indian Empire but in the adjoining countries towards north, east and south such as Nepal, Central Asia, Javā, Cambodia and Ceylon, wherever the influence of the civilization of India has penetrated. The earliest records found in India are mostly in Pāli and Prākrit barring of course the recent discoveries in the Punjab and Sind of a pictographic script the key to the decipherment of which is not yet in sight. In the early centuries of the Christian era Sanskrit seems to have established its position as the language of official records and from this period onwards most of the inscriptions on stone and copperplate are in Sanskrit. The object that prompted the engraving of these inscriptions was generally the recording of some pious donation of a village or the building of a temple or even that of describing the exploits of a king. In all these cases it is therefore futile to expect any flashes of literary merit in the compositions recorded in inscriptions. But sometimes when a court poet sets himself to the task of extolling the virtues and exploits of his patron king and his ancestors the result is sometimes recorded in excellent specimens of Sanskrit *Kâvya* or artificial poetry. These *Praśastis* very often contain not only the same ideas but also words and phrases similar to those found in the standard classical poetry of the masters of Sanskrit literature.* This

* See Dr. Buhler's essay on 'The Indian Inscriptions and the Antiquity of Indian Artificial Poetry' published in the *Indian Antiquary of 1913*.

has eventually been the means of proving that classical literature was cultivated in India at a comparatively later date although the earliest compositions in the Sanskrit language must go back several millenia before the Christian era.

The present edition of the text of Sanskrit inscriptions has been undertaken with a twofold object in view. In the first place it is proposed to give a selection of Sanskrit inscriptions from the second century to the eighth century A. D. in their chronological order. The selection of texts has been made more with a view to illustrate passages possessing literary merit than owing to their historical or religious importance. Only the text of each inscription is given here as the notes and translations are reserved for a separate volume. The characters used are Devanāgarî which are easily understood by the students of Indian Universities for whom the book is mainly intended. Corrections have been made in the forms of the words as found in the inscriptions so as to remove the orthographical peculiarities in the originals and bring the composition in a line with the language of standard Sanskrit literature. Another purpose expected to be served by the edition is to popularise Indian Epigraphy. The student of Sanskrit literature in the Indian Universities is at present completely ignorant of the ancient records of this country the study of which is limited to a small circle of Epigraphists. If this edition serves to demonstrate to the student of literature that some of the inscriptions at least possess real poetical merit and are besides of a special value as a means to determine the historical sequence of Classical Literature, the Epigraphists' interest will be shared by the student of Literature. The wider study of Indian inscriptions by an ever increasing band of scholars is sure to give much needed stimulus to research in the domain of the literary and social history of India during the period represented by the inscriptions. The gain to the history of Sanskrit literature by a more thorough study of inscriptions

cannot be exaggerated. Even the most wellknown of Classical poets viz. Kālidāsa has left no record as to the time when and the place where he lived. We owe it to an *inscription that we now know the posterior limit to which he can be assigned, viz. 634 A. D. The inscriptions of the Gurjara-Pratihāra kings, Mahendrapāla and Mahīpāla, who, we know, ruled during the last decade of the ninth century and in the beginning of the tenth century of the Christian era enable us to fix the time of the dramatist and poet Rājas'ekhar, whose pupils and patrons they were. In this way inscriptions have been of great use to us in determining the approximate period of many of our Classical authors.

I must express my obligations to the several scholars on whose devoted labours the subject matter of this edition is based. I express my sincere thanks to Sir John Marshall, the Director General of Archœology in India, for his courtesy in allowing me to copy the inscriptions from Government publications issued by the Archœological Department, and to the proprietors of other Journals from which the remaining inscriptions are copied. My special thanks are due to Rao Bahadur H. Krishna s'astri, Government Epigraphist for India who kindly consented at my request to write a preface to this small edition. I am also indebted to my friend, Mr. K. N. Dikshit M. A., Superintendent Archœological Survey W. C. Poona for making many valuable suggestions in this work.

Rajkot
20th March 1925. } D. B. DISKALKAR.

* No 12 in the edition.

# CONTENTS.

Pages

No. 1. Girnār Rock Inscription of Rudradāman, of about Śaka yr. 72 (of about 150 A. D.) (Epigraphia Indica, Vol. VIII, p. 47.) 1

No. 2. Meharauli Posthumous Iron Pillar Inscription of Chandra, Not dated (of about 340 A. D. ?) (Fleet's Gupta Inscriptions, No. 32.) 3

No. 3. Allahabad Stone Pillar Inscription of Samudragupta, Not dated (of about 360 A. D.) (Fleet's Gupta Inscriptions, No. 1.) 4

No. 4. Girnār Rock Inscription of Skandagupta, of Gupta Saṁvat 138 (457 A. D.) (Fleet's Gupta Inscriptions, No. 14.) 7

No. 5. Mandasor Stone Inscription of Kumāragupta and Bandhuvarman, of Mālava Saṁvat 529 (473 A. D.) (Fleet's Gupta Inscriptions, No. 18.) 13

No. 6. Mandasor Stone Pillar Inscription of Yaśodharman, Not dated (of about 532 A. D.) (Fleet's Gupta Inscriptions, No. 33.) 19

No. 7. Mandasor Stone Inscription of Yaśodharman and Vishnuvardhana, of Mālava Saṁvat 589 (532 A. D.) (Fleet's Gupta Inscriptions, No. 35.) 21

No. 8. Haraha Stone Inscription of Īśānavarman, of Mālava Saṁvat 611 (555 A. D.) (Epigraphia Indica, Vol. XIV, p. 115.) 25

No. 9. Valabhī Copperplate Inscription of Dharasena I. of Gupta Valabhī Saṁvat 269 (588 A. D.) (Indian Antiquary, Vol. VI, p. 9.) 29

No. 10. Camboja Stone Inscription of Bhavavarman, Not dated (of about 600 A. D.) (Kāvyamālā Vol. 34 p. 202.) 32

No. 11. Bānskherā Copperplate Inscription of Harsha, of Harsha Saṁvat 22 (628 A. D.) (Epigraphia Indica, Vol. IV, p. 208.) 35

No. 12. Aihole Stone Inscription of Pulikeśī II, of Śaka year 556 and Bhārata War yr. 3735 (634 A. D.) (Epigraphia Indica, Vol. VI, p. 1.) 37

No. 13. Udaipur Stone Inscription of Jayavarman, of [Vikrama] Saṁvat 718 (661 A. D.) (Epigraphia Indica, Vol. IV, p. 29.) 42

No. 14. Aphsaḍ Stone Inscription of Ādityasena, Not dated (of about the last quarter of the 7th cent. A. D.) (Fleet's Gupta Inscriptions, No. 42.) 44

No. 15. Rāgim Copperplate Inscription of Tīvaradeva, of the 7th yr. of his reign (of the last quarter of the 8th cent. A. D.) (Fleet's Gupta Inscriptions, No. 81). 48

# SELECTIONS.

From

## Sanskrit Inscriptions.

### Part I - Text.

### No. 1.

### Girnar Rock Inscription of Rudradaman of S'aka yr. 72 (150 A. D.)

सिद्धम्। इदं तडाकं सुदर्शनं गिरिनगरादपि......मृत्तिकोपलविस्तारायामोच्छ्रयनिःसन्धिबद्धदृढसर्वपालीकत्वात्पर्वतपादप्रतिस्पर्धिसुश्लिष्टबन्धं .........मवजातेनाकृत्रिमेण सेतुबन्धेनोपपन्नं सुप्रतिविहितप्रणालीपरीवाहमीढविधानं च त्रिस्कन्धं .........नादिभिरनुग्रहैर्महत्युपचये वर्तते। तदिदं राज्ञो महाक्षत्रपस्य सुगृहीतनाम्नः स्वामिचष्टनस्य पौत्रस्य राज्ञः क्षत्रपस्य जयदाम्नः पुत्रस्य राज्ञो महाक्षत्रपस्य गुरुभिरभ्यस्तनाम्नो रुद्रदाम्नो वर्षे द्विसप्ततितमे ७२ मार्गशीर्षबहुलप्रतिपदायां ...... सृष्टवृष्टिना पर्जन्येनैकार्णवभूतायामिव पृथिव्यां कृतायां गिरेरूर्जयतः सुवर्णसिकतापलाशिनीप्रभृतीनां नदीनामतिमात्रोद्वृत्तैर्वेगैः सेतुम ...... यमाणानुरूपप्रतीकारमपि गिरिशिखरतरुतटाट्टालकोपतल्पद्वारशरणोच्छ्रयविध्वंसिना युगनिधनसदृशपरमघोरवेगेन वायुना प्रमथितसलिलविक्षिप्तजर्ज्जरीकृताव ...... क्षिप्ताश्मवृक्षगुल्मलताप्रतानमानदीतलादित्युद्घाटितमासीत्। चत्वारि हस्तशतानि विंशदुत्तराण्यायतेनैतावन्त्येव विस्तीर्णेन पञ्चसप्ततिहस्तानवगाढेन भेदेन निःसृतसर्वतोयं मरुधन्वकल्पमातिभृशं दुर्दर्शनं ... ... ... स्यार्थे मौर्यस्य राज्ञः चन्द्रगुप्तस्य राष्ट्रियेण वैश्येन पुष्यगुप्तेन कारितमशोकस्य मौर्यस्य कृते यवनराजेन तुषास्फेना-

धिष्ठाय प्रणालीभिरलङ्कृतं तत्कारितया च राजानुरूपकृतविधानया तास्मिन्भेदे दृष्टया प्रणाड्या विस्तृतसेतु ... ... ... णागर्भात्प्रभृत्यविहतसमुदितराजलक्ष्मीधारणागुणत: सर्ववर्णैरभिगम्य रक्षणार्थं पतित्वे वृतेनाप्राणोच्छ्वासात्पुरुषवधनिवृत्तिकृतसत्यप्रातिज्ञेनान्यत्र संग्रामेष्वभिमुखागतसदृशशत्रुप्रहरणवितरणत्वाविगुणरिपु ......... धृतकारुण्येन स्वयमभिगतजनपदप्रणिपतितायुषशरणदेन दस्युव्यालमृगरोगादिभिरनुपसृष्टपूर्वनगरनिगमजनपदानां स्ववीर्यार्जितानामनुरक्तसर्वप्रकृतीनां पूर्वापराकरावन्त्यनूपनीवृदानर्त्तसुराष्ट्रश्वभ्र[म]रुकच्छसिन्धुसौवीरकुकुरापरांतनिषादादीनां समग्राणां तत्प्रभावाद्य ...... र्थकामविषयाणां विषयाणां पत्या सर्वक्षत्राविष्कृतवीरशब्दजातोत्सेकाविधेयानां **यौधेयानां** प्रसह्योत्सादकेन **दक्षिणापथ**पतेः **सातकर्णे**र्द्विरपि निर्व्याजमवजित्यावजित्य सम्बन्धाविदूरतयानुत्सादनात्प्राप्तयशसा मा... प्तविजयेन भ्रष्टराजप्रतिष्ठापकेन यथार्थहस्तोच्छ्रयार्जितोर्जितधर्मानुरागेण शब्दार्थगान्धर्वन्यायाद्यानां विद्यानां महतीनां पारणधारणविज्ञानप्रयोगावाप्तविपुलकीर्तिना तुरंगगजरथचर्यासिचर्मनियुद्धाद्या ......... परबललाघवसौष्ठवक्रियेणाहरहर्दानमानानवमानशीलेन स्थूललक्षेण यथावत्प्राप्तैर्बलिशुल्कभागैः कनकरजतवज्रवैडूर्यरत्नोपचयविष्यन्दमानकोशेन स्फुटलघुमधुराचित्रकान्तशब्दसमयोदारालङ्कृतगद्यपद्य ......... न प्रमाणमानोन्मानस्वरगतिवर्णसारसत्त्वादिभिः परमलक्षणव्यञ्जनैरुपेतकान्तमूर्तिना स्वयमधिगतमहाक्षत्रपनाम्ना नरेन्द्रकन्यास्वयंवरानेकमाल्यप्राप्तदाम्ना महाक्षत्रपेण **रुद्रदाम्ना** वर्षसहस्राय गोब्राह्म ...... र्थं धर्मकीर्तिवृद्ध्यर्थं चापीडयित्वा करविष्टिप्रणयक्रियाभिः पौरजानपदं जनं स्वस्मात्कोशान्महता धनौघेनानतिमहता च कालेन त्रिगुणदृढतरविस्तारायामं सेतुं विधाय सर्वतटे......... सुदर्शनतरं कारितमिति। अस्मिन्नर्थे **महाक्षत्रपस्य** मतिसचिवकर्मसचिवैरमात्यगुणसमुद्युक्तैरप्यतिमहत्त्वाद्भेदस्यानुत्साहविमुखमतिभिः प्रत्याख्यातारम्भं पुनःसेतुबन्ध-

नैराश्याद्धाहाभूतासु प्रजास्विहाधिष्ठाने पौरजानपदजनानुग्रहार्थं पार्थिवेन कृत्स्नानामानर्त्तसुराष्ट्राणां पालनार्थं नियुक्तेन **पह्लवेन** कुलैपपुत्रेणामात्येन **सुविशाखेन** यथावदर्थधर्मव्यवहारदर्शनैरनुरागमभिवर्द्धयता शक्तेन दान्तेनाचपलेनाविस्मितेनार्येणाहार्येण स्वाधितिष्ठता धर्मकीर्तियशांसि भर्तुरभिवर्द्धयतानुष्ठितमिति ।

---

## No. 2.

## Meharauli Posthumous Iron Pillar Inscription of Chandra.

**Not dated** ( of about 340 ? A, D. )

यस्योद्वर्तयतः प्रतीपमुरसा शत्रून्समेत्यागता-
**न्वङ्गेष्वा**हववर्तिनोऽभिलिखिता खड्गेन कीर्तिर्भुजे ।
तीर्त्वा सप्त मुखानि येन समरे **सिन्धोर्जिता वाह्लिका**
यस्याद्याप्यधिवास्यते जलनिधिर्वीर्यानिलैर्दक्षिणः ॥ १ ॥

खिन्नस्येव विसृज्य गां नरपतेर्गामाश्रितस्येतरां
मूर्त्या कर्मजितावनीं गतवतः कीर्त्या स्थितस्य क्षितौ ।
शान्तस्येव महावने हुतभुजो यस्य प्रतापो महा-
नद्याप्युत्सृजाति प्रणाशितारिपोर्यत्नस्य शेषः क्षितिम् ॥ २ ॥

प्राप्तेन स्वभुजार्जितं च सुचिरं चैकाधिराज्यं क्षितौ
**चन्द्राह्वेन** समग्रचन्द्रसदृशीं वक्त्रश्रियं बिभ्रता ।
तेनायं प्रणिधाय भूमिपतिना भावेन विष्णौ मतिं
**प्रांशुर्विष्णुपदे** गिरौ भगवतो विष्णोर्ध्वजः स्थापितः ॥३॥

---

## No. 3.

## Allahabad Stone Pillar Inscription of Samudragupta

### Not dated ( of about 350 A. D. )

यः कुल्यैः स्वै.........तस..........
..................................... ।
यस्य ?.........................
..................................... ॥ १ ॥
पुंव ( ? ) ..............................
स्फारद्व ( ? ) क्षः स्फुटोद्ध्वंसित.......... ।
......प्रवितत......................
..................................... ॥ २ ॥
यस्य प्रज्ञानुषङ्गोचितसुखमनसः शास्त्रतत्त्वार्थभर्तुः
— — स्तब्धो ◡ — — — ◡ नि ◡ ◡ ◡ ◡ — — — नोच्छ्र — ◡ — — ।
सत्काव्यश्रीविरोधान्बुधगुणितगुणाज्ञाहतानेव कृत्वा
विद्वल्लोके वि— —स्फुटबहुकविताकीर्तिराज्यं भुनक्ति ॥ ३ ॥
आर्यो हीत्युपगुह्य भावपिशुनैरुत्कर्णितै रोमभिः
सभ्येषूच्छ्वसितेषु तुल्यकुलजम्लानाननोद्वीक्षितः ।
स्नेहव्याकुलितेन बाष्पगुरुणा तत्त्वेक्षिणा चक्षुषा
यः पित्राभिहितो निरीक्ष्य निखिलां पाह्येवमूर्वीमिति ॥ ४ ॥
दृष्ट्वा कर्माण्यनेकान्यमनुजसदृशान्यद्भुतोद्भिन्नहर्षा
भावैरास्वादय — ◡ ◡ ◡ ◡ ◡ ◡ ◡ — — — ◡ — — — केचित् ।
वीर्योत्तप्ताश्च केचिच्छरणमुपगता यस्य वृत्ते प्रणामे
— र्ते — — ◡ — — — ◡ ◡ ◡ ◡ ◡ ◡ — — — ◡ — — — ◡ — ◡ ॥ ५ ॥
संग्रामेषु स्वभुजविजिता नित्यमुच्छापकाराः
श्वः श्वो मानप्र ◡ ◡ ◡ ◡ — — — ◡ — — — ◡ — — — ।
तोषोत्तुङ्गैः स्फुटबहुरसस्नेहफुल्लैर्मनोभिः
पश्चात्तापं व ◡ ◡ ◡ ◡ — — — ◡ स्याद्धसन्तम् ॥ ६ ॥

उद्वेलोदितबाहुवीर्यरभसादेकेन येन क्षणा-
दुन्मूल्याच्युतनागसेन ᵕ ᵕ – – – – ᵕ – – – ᵕ – ।
दण्डग्राहयतैव कोटकुलजं पुष्पाह्वये क्रीडता
सूर्ये ने ᵕ ᵕ – ᵕ – तट ᵕ – – – – ᵕ – – – ᵕ – ॥ ७ ॥

धर्मप्राचीरबन्धः शशिकरशुचयः कीर्तयः सप्रताना
वैदुष्यं तत्त्वभेदि प्रशम ᵕ ᵕ ᵕ – – – – – – – ᵕ तार्थम् ।
अध्येयः सूक्तमार्गः कविमतिविभवोत्सारणं चापि काव्यं
को नु स्याद्योऽस्य न स्याद्गुणमतिविदुषां ध्यानपात्रं य एकः॥८॥

तस्य विविधसमरशतावतरणदक्षस्य स्वभुजबलपराक्रमैकबन्धोः पराक्रमाङ्कस्य परशुशरशङ्कुशक्तिप्रासासितोमरभिन्दिपालनाराचवैतस्तिकाद्यनेकप्रहरणविरूढाकुलव्रणशताङ्कशोभासमुदयोपचितकान्ततरवर्ष्मणः कौसलकमहेन्द्रमाहाकान्तारकव्याघ्रराजकैरलकमण्टराजपैष्टपुरकमहेन्द्रगिरिकौट्टूरकस्वामिदत्तैरण्डपल्लकदमनकाञ्चेयकविष्णुगोपावमुक्तकनीलराजवैङ्गेयकहस्तिवर्मपालक्ककोग्रसेनदैवराष्ट्रककुबेरकौस्थलपुरकधनञ्जयप्रभृतिसर्वदाक्षिणापथराजग्रहणमोक्षानुग्रहजनितप्रतापोन्मिश्रमाहाभाग्यस्य, रुद्रदेवमतिलनागदत्तचन्द्रवर्मगणपतिनागनागसेनाच्युतनन्दिबलवर्माद्यनेकार्यावर्तराजप्रसभोद्धरणोद्वृत्तप्रभावमहतः, परिचारकीकृतसर्वाटविकराजस्य, समतटडवाककामरूपनेपालकर्तृपुरादिप्रत्यन्तनृपतिभिर्मालवार्जुनायनयौधेयमाद्रकाभीरप्रार्जुनसनकानीककाकखरपरिकादिभिश्च सर्वकरदानाज्ञाकरणप्रणामागमनपरितोषितप्रचण्डशासनस्य, अनेकभ्रष्टराज्योत्सन्नराजवंशप्रातिष्ठापनोद्भूतनिखिलभुवनाविचरणशान्तयशसः, दैवपुत्रशाहिशाहानुशाहिशकमुरुण्डैः सैंहलकादिभिश्च सर्वद्वीपवासिभिरात्मनिवेदनकन्योपायनदानगरुत्मदङ्कस्वविषयभुक्तिशासनयाचनाद्युपायसेवाकृतबाहुवीर्यप्रसरधरणिबन्धस्य, पृथिव्यामप्रतिरथस्य, सुचरितशतालङ्कृतानेकगुणगणोत्सिक्तिभिश्चरणतलप्रमृ-

ध्यान्यनरपतिकीर्तेः, साध्वसाधूदयप्रलयहेतुपुरुषस्याचिन्त्यस्य, भक्त्यवनतिमात्रग्राह्यमृदुहृदयस्यानुकम्पावतोऽनेकगोशतसहस्रप्रदायिनः, कृपणदीनानाथातुरजनोद्धरणमन्त्रदीक्षाद्युपगतमनसः, समिद्धस्य विग्रहवतो लोकानुग्रहस्य धनदवरुणेन्द्रान्तकसमस्य स्वभुजबलविजितानेकनरपतिविभवप्रत्यर्पणानित्यव्यापृतायुक्तपुरुषस्य, निशितविदग्धमतिगान्धर्वललितैर्व्रीडितत्रिदशपतिगुरुतुम्बुरुनारदादेर्विद्वज्जनोपजीव्यानेककाव्यक्रियाभिः प्रतिष्ठितकविराजशब्दस्य, सुचिरस्तोतव्यानेकाद्भुतोदारचरितस्य लोकसमयक्रियानुविधानमात्रमानुषस्य लोकधाम्नो देवस्य महाराजश्री**गुप्त**प्रपौत्रस्य महाराजश्री**घटोत्कच**पौत्रस्य महाराजाधिराजश्री**चन्द्रगुप्त**पुत्रस्य **लिच्छवि**दौहित्रस्य महादेव्यां **कुमारदेव्या**मुत्पन्नस्य महाराजाधिराजश्री**समुद्रगुप्त**स्य सर्वपृथिवीविजयजनितोदयव्याप्तनिखिलावनितलां कीर्तिमितस्त्रिदशपतिभवनगमनावाप्तललितसुखविचरणामाचक्षाण इव भुवो बाहुरयमुच्छ्रितः स्तम्भः । यस्य

प्रदानभुजविक्रमप्रशमशास्त्रवाक्योदयै-<br>
रुपर्युपरिसञ्चयोच्छ्रितमनेकमार्गं यशः ।<br>
पुनाति भुवनत्रयं पशुपतेर्जटान्तर्गुहा-<br>
निरोधपरिमोक्षशीघ्रमिव पाण्डु गाङ्गं पयः ॥ १ ॥

एतच्च काव्यमेषामेव भट्टारकपादानां दासस्य समीपपरिसर्पणानुग्रहोन्मीलितमतेः खाद्यटपाकिकस्य महादण्डनायकध्रुवभूतिपुत्रस्य सान्धिविग्रहिककुमारामात्यमहादण्डनायक**हरिषेण**स्य सर्वभूतहितसुखायास्तु । अनुष्ठितं च परमभट्टारकपादानुध्यातेन महादण्डनायक**तिलभट्टकेन** ।

## No. 4.

## Girnar Rock Inscription of Skandagupta of Gupta Saṃvat 138 ( 457 A. D. )

श्रियमभिमतभोग्यां नैककालापनीतां
त्रिदशपतिसुखार्थं यो बलेराजहार ।
कमलनिलयनायाः शाश्वतं धाम लक्ष्म्याः
स जयति विजितार्तिर्विष्णुरत्यन्तजिष्णुः ॥ १ ॥

तदनु जयति शश्वच्छ्रीपरिक्षिप्तवक्षाः
स्वभुजजनितवीर्यो राजराजाधिराजः ।
नरपतिभुजगानां मानदर्पोत्फणानां
प्रतिकृतिगरुडाज्ञां निर्विषीं चावकर्ता ॥ २ ॥

नृपतिगुणनिकेतः **स्कन्दगुप्तः** पृथुश्री-
श्चतुरुदधिजलान्तां स्फीतपर्यन्तदेशाम् ।
अवनिमवनतारिर्यश्चकारात्मसंस्थां
पितरि सुरसखित्वं प्राप्तवत्यात्मशक्त्या ॥ ३ ॥

अपि च जितमेव तेन प्रथयन्ति यशांसि यस्य ।
रिपवोऽप्यामूलभग्नदर्पा निर्वचना (?) **म्लेच्छदेशेषु** ॥ ४ ॥

क्रमेण बुद्ध्या निपुणं प्रधार्य
ध्यात्वा च कृत्स्नान्गुणदोषहेतून् ।
व्यपेत्य सर्वान्मनुजेन्द्रपुत्राँ-
ल्लक्ष्मीः स्वयं यं वरयांचकार ॥ ५ ॥

तस्मिन्नृपे शासति नैव कश्चि-
द्धर्मादपेतो मनुजः प्रजासु ।
आर्तो दरिद्रो व्यसनी कदर्यो
दण्ड्यो न वा यो भृशपीडितः स्यात् ॥ ६ ॥

एवं स जित्वा पृथिवीं समग्रां
भग्नाग्रदर्पान्द्विषतश्च कृत्वा ।
सर्वेषु देशेषु विधाय गोप्तॄ-
न्संचिन्तयामास बहुप्रकारम् ॥ ७ ॥

स्यात्कोऽनुरूपो मतिमान्विनीतो
मेधास्मृतिभ्यामनपेतभावः ।
सत्यार्जवौदार्यनयोपपन्नो
माधुर्यदाक्षिण्ययशोऽन्वितश्च ॥ ८ ॥

भक्तोऽनुरक्तो नृविशेषयुक्तः
सर्वोपधाभिश्च विशुद्धबुद्धिः ।
आनृण्यभावोपगतान्तरात्मा
सर्वस्य लोकस्य हिते प्रवृत्तः ॥ ९ ॥

न्यायार्जनेऽर्थस्य च कः समर्थः
स्यादर्जितस्याप्यथ रक्षणे च ।
गोपायितस्यापि च वृद्धिहेतौ
वृद्धस्य पात्रप्रतिपादनाय ॥ १० ॥

सर्वेषु भृत्येष्वपि संहतेषु
यो मे प्रशिष्यान्निखिलान्**सुराष्ट्रान्** ।
आं ज्ञातमेकः खलु **पर्णदत्तो**
भारस्य तस्योद्वहने समर्थः ॥ ११ ॥

एवं विनिश्चित्य नृपाधिपेन
नैकानहोरात्रगणान्स्वमत्या ।
यः सन्नियुक्तोऽर्थनया कथंचि-
त्सम्यक्**सुराष्ट्रा**वनिपालनाय ॥ १२ ॥

नियुज्य देवा वरुणं प्रतीच्यां
स्वस्था यथा नोन्मनसो बभूवुः ।

पूर्वेतरस्यां दिशि **पर्णदत्तं**
नियुज्य राजा धृतिमांस्तथाभूत् ॥ १३ ॥

तस्यात्मजो ह्यात्मजभावयुक्तो
द्विधेव चात्मात्मवशेन नीतः ।
सर्वात्मनात्मेव च रक्षणीयो
नित्यात्मवानात्मजकान्तरूपः ॥ १४ ॥

रूपानुरूपैर्ललितैर्विचित्रै-
र्नित्यप्रमोदान्वितसर्वभावः ।
प्रबुद्धपद्माकरपद्मवक्त्रो
नृणां शरण्यः शरणागतानाम् ॥ १५ ॥

अभवद्भुवि **चक्रपालितो**ऽसा-
विति नाम्ना प्रथितः प्रियो जनस्य ।
स्वगुणैरनुपस्कृतैरुदात्तैः
पितरं यश्च विशेषयांचकार ॥ १६ ॥

क्षमा प्रभुत्वं विनयो नयश्च
शौर्यं विना शौर्यमहार्चनं च ।
वाक्यं दमो दानमदीनता च
दाक्षिण्यमानृण्यमशून्यता च ॥ १७ ॥

सौन्दर्यमार्येतरनिग्रहश्च
अविस्मयो धैर्यमुदीर्णता च ।
इत्येवमेतेऽतिशयेन यस्मि-
न्नविप्रवासेन गुणा वसन्ति ॥ १८ ॥

न विद्यतेऽसौ सकलेऽपि लोके
यत्रोपमा तस्य गुणैः क्रियेत ।

स एव कात्स्न्येंन गुणान्वितानां
बभूव नृणामुपमानभूतः ॥ १९ ॥

इत्येवमेतानधिकानतोन्या-
न्गुणान्परीक्ष्य स्वयमेव पित्रा ।
यः सन्नियुक्तो नगरस्य रक्षां
विशिष्य पूर्वान्प्रचकार सम्यक् ॥ २० ॥

आश्रित्य वीर्यं स्वभुजद्वयस्य
स्वस्यैव नान्यस्य नरस्य दर्पम् ।
नोद्वेजयामास च कञ्चिदेव-
मस्मिन्पुरे चैव शशास दुष्टान् ॥ २१ ॥

विस्रम्भमल्पे न शशाम योऽस्मि-
न्काले न लोकेषु सनागरेषु ।
यो लालयामास च पौरवर्गान्
— — ⏑ पुत्रान्सुपरीक्ष्य दोषान् ॥ २२ ॥

संरञ्जयां च प्रकृतीर्बभूव
पूर्वस्मिताभाषणमानदानैः ।
निर्यन्त्रणान्योन्यगृहप्रवेशैः
संवर्धितप्रीतिगृहोपचारैः ॥ २३ ॥

ब्रह्मण्यभावेन परेण युक्तः
शक्तः शुचिर्दानपरो यथावत् ।
प्राप्यान्स काले विषयान्सिषेवे
धर्मार्थयोश्चाप्यविरोधनेन ॥ २४ ॥

यो — ⏑ — — ⏑ ⏑ पर्णदत्ता-
त्स न्यायवानत्र किमस्ति चित्रम्

मुक्ताकलापाम्बुजपद्मशीता-
श्चन्द्रात्किमुष्णं भविता कदाचित् ॥ २५ ॥

अथ क्रमेणाम्बुदकाल आगते
निदाघकालं प्रविदार्य तोयदैः ।
ववर्ष तोयं बहु सन्ततं चिरं
सुदर्शनं येन बिभेद चात्वरात् ॥ २६ ॥

संवत्सराणामधिके शते तु
त्रिंशद्भिरन्यैरपि षड्भिरेव ।
रात्रौ दिने प्रौष्ठपदस्य षष्ठे
गुप्तप्रकाले गणनां विधाय ॥ २७ ॥

इमाश्च या रैवतकाद्विनिर्गताः
पलाशिनीयं सिकताविलासिनी ।
समुद्रकान्ताश्चिरबन्धनोषिताः
पुनः पतिं शास्त्रयथोचितं ययुः ॥ २८ ॥

अवेक्ष्य वर्षागमजं महोद्भ्रमं
महोदधेरूर्जयता प्रियेप्सुना ।
अनेकतीरान्तजपुष्पशोभितो
नदीमयो हस्त इव प्रसारितः ॥ २९ ॥

विषाद्यमानाः खलु सर्वतो जनाः
कथं कथं कार्यमिति प्रवादिनः ।
मिथो हि पूर्वापररात्रमुत्थिता
विचिन्तयां चापि बभूवुरुत्सुकाः ॥ ३० ॥

अपीह लोके सकले सुदर्शनं
पुमान्हि दुर्दर्शनतां गतं क्षणात् ।
भवेन्नु साम्भोनिधितुल्यदर्शनं
सुदर्शनं — ᴗ ᴗ — ᴗ — ᴗ — ॥ ३१ ॥

⏑ – ⏑ – – ⏑ वणे स भूत्वा
    पितुः परां भक्तिमपि प्रदर्श्य ।
धर्मं पुरोधाय शुभानुबन्धं
    राज्ञो हितार्थं नगरस्य चैव ॥ ३२ ॥

संवत्सराणामधिके शते तु
    त्रिंशद्भिरन्यैरपि सप्तभिश्च ।
प्र – ⏑ – – ⏑ ⏑ शास्त्रवेत्ता
    (?) विश्वोऽप्यनुज्ञातमहाप्रभावः ॥ ३३ ॥

आज्यप्रणामैर्विबुधानथेष्ट्वा
    धनैर्द्विजातीनपि तर्पयित्वा ।
पौरांस्तथाभ्यर्च्य यथार्हमानै-
    र्भृत्यांश्च पूज्यान्सुहृदश्च दानैः ॥ ३४ ॥

ग्रैष्मस्य मासस्य तु पूर्वपक्षे
    ⏑ – ⏑ – – प्रथमेऽह्नि सम्यक् ।
मासद्वयेनादरवान्स भूत्वा
    धनस्य कृत्वा व्ययमप्रमेयम् ॥ ३५ ॥

आयामतो हस्तशतं समग्रं
    विस्तारतः षष्टिरथापि चाष्टौ ।
उत्सेधतोऽन्यत्पुरुषाणि सप्त
    ⏑ – ⏑ – हस्तशतद्वयस्य ॥ ३६ ॥

बबन्ध यत्नान्महतो नृदेवा-
    नभ्यर्च्य सम्यग्घटितोपलेन ।
अजातिदुष्टं प्रथितं तटाकं
    **सुदर्शनं** शाश्वतकल्पकालम् ॥ ३७ ॥

अपि च सुदृढसेतुप्रान्तविन्यस्तशोभा-
    रथचरणसमाह्वक्रौञ्चहंसासधूतम् ।

विमलसलिल ———◡———◡——
भुवि त ◡◡◡————◡—र्कः शशी च ॥ ३८ ॥
नगरमपि च भूयाद्वृद्धिमत्पौरजुष्टं
द्विजबहुशतगीतब्रह्मनिर्नष्टपापम् ।
शतमपि च समानामीतिदुर्भिक्ष——
◡◡◡◡◡◡———◡———◡——॥ ३९ ॥

इति सुदर्शनतटाकसंस्कारग्रन्थरचना समाप्ता ।

---

## No. 5.

## Mandasore Stone Inscription of Kumaragupta and Bandhuvarman.

### of Malava Sam 529 ( 473 A. D. )

यो वृत्त्यर्थमुपास्यते सुरगणैः सिद्धैश्च सिद्ध्यर्थिभि-
र्ध्यानैकाग्रपरैर्विधेयविषयैर्मोक्षार्थिभिर्योगिभिः ।
भक्त्या तीव्रतपोधनैश्च मुनिभिः शापप्रसादक्षमै-
र्हेतुर्यो जगतः क्षयाभ्युदययोः पायात्स वो भास्करः ॥ १ ॥
तत्त्वज्ञानविदोऽपि यस्य न विदुर्ब्रह्मर्षयोऽभ्युद्यताः
कृत्स्नं यश्च गभस्तिभिः प्रविसृतैः पुष्णाति लोकत्रयम् ।
गन्धर्वामरसिद्धकिन्नरनरैः संस्तूयतेऽभ्युत्थितो
भक्तेभ्यश्च ददाति योऽभिलषितं तस्मै सवित्रे नमः ॥ २ ॥
यः प्रत्यहं प्रतिविभात्युदयाचलेन्द्र-
विस्तीर्णतुङ्गशिखरस्खलितांशुजालः ।
क्षीबाङ्गनाजनकपोलतलाभिताम्रः
पायात्स वः सुकिरणाभरणो विवस्वान् ॥ ३ ॥
कुसुमभरानततरुवरदेवकुलसभाविहाररमणीयात् ।
लाटविषयान्नगावृतशैलाज्जगति प्रथितशिल्पाः ॥ ४ ॥

ते देशपार्थिवगुणापहृताः प्रकाश-
मध्वादिजान्यविरलान्यसुखान्यपास्य ।
जातादरा दशपुरं प्रथमं मनोभि-
रन्वागताः ससुतबन्धुजनाः समेत्य ॥ ५ ॥

मत्तेभगण्डतटविच्युतदानबिन्दु-
सिक्तोपलाचलसहस्रविभूषणायाः ।
पुष्पावनम्रतरुमण्डवतंसकाया
भूमेः परं तिलकभूतमिदं क्रमेण ॥ ६ ॥

तटोत्थवृक्षच्युतनैकपुष्प-
विचित्रतीरान्तजलानि भान्ति ।
प्रफुल्लपद्माभरणानि यत्र
सरांसि कारण्डवसङ्कुलानि ॥ ७ ॥

विलोलवीचीचलितारविन्द-
पतद्रजःपिञ्जरितैश्च हंसैः ।
स्वकेसरोदारभरावभुग्नैः
क्वचित्सरांस्यम्बुरुहैश्च भान्ति ॥ ८ ॥

स्वपुष्पभारावनतैर्नगेन्द्रै-
र्मदप्रगल्भालिकुलस्वनैश्च ।
अजस्रगाभिश्च पुराङ्गनाभि-
र्वनानि यस्मिन्समलङ्कृतानि ॥ ९ ॥

चलत्पताकान्यबलासनाथा-
न्यत्यर्थशुक्लान्यधिकोन्नतानि ।
तडिल्लताचित्रसिताभ्रकूट-
तुल्योपमानानि गृहाणि यत्र ॥ १० ॥

कैलासतुङ्गशिखरप्रतिमानि चान्या-
न्याभान्ति दीर्घवलभीनि सवेदिकानि ।

गान्धर्वशब्दमुखराणि निविष्टचित्र-
कर्माणि लोलकदलीवनशोभितानि ॥ ११ ॥

प्रासादमालाभिरलङ्कृतानि
धरां विदार्यैव समुत्थितानि ।
विमानमालासदृशानि यत्र
गृहाणि पूर्णेन्दुकरामलानि ॥ १२ ॥

यद्भात्यभिरम्यसरिद्द्वयेन चपलोर्मिणा समुपगूढम् ।
रहसि कुचशालिनीभ्यां प्रीतिरतिभ्यां स्मराङ्गमिव ॥ १३ ॥

सत्यक्षमादमशमव्रतशौचधैर्य-
स्वाध्यायवृत्तविनयस्थितिबुद्ध्युपेतैः ।
विद्यातपोनिधिभिरस्मयितैश्च विप्रै-
र्यद्भ्राजते ग्रहगणैः खमिव प्रदीप्तैः ॥ १४ ॥

अथ समेत्य निरन्तरसङ्गतै-
रहरहः प्रविजृम्भितसौहृदाः ।
नृपतिभिः सुतवत्प्रतिमानिताः
प्रमुदितान्यवसन्त सुखं पुरे ॥ १५ ॥

श्रवणसुभगं धानुर्वेद्यं दृढं परिनिष्ठितैः
सुचरितशतासङ्गाः केचिद्विचित्रकथाविदः ।
विनयनिभृताः सम्यग्धर्मप्रसङ्गपरायणाः
प्रियमपरुषं पथ्यं चान्ये क्षमा बहु भाषितुम् ॥ १६ ॥

केचित्स्वकर्मण्यधिकास्तथान्यै-
र्विज्ञायते ज्योतिषमात्मवद्भिः ।
अद्यापि चान्ये समरप्रगल्भाः
कुर्वन्त्यरीणामहितं प्रसह्य ॥ १७ ॥

प्राज्ञा मनोज्ञवधवः प्रथितोरुवंशा
वंशानुरूपचरिताभरणास्तथान्ये ।
सत्यव्रताः प्रणयिनामुपकारदक्षा
विस्रम्भपूर्वमपरे दृढसौहृदाश्च ॥ १८ ॥

विजितविषयसङ्गैर्धर्मशीलैस्तथान्यै-
र्मृदुभिराधिकसत्त्वैर्लोकयात्रामरैश्च ।
स्वकुलतिलकभूतैर्मुक्तरागैरुदारै-
रधिकमभिविभाति श्रेणिरेवंप्रकारैः ॥ १९ ॥

तारुण्यकान्त्युपचितोऽपि सुवर्णहार-
ताम्बूलपुष्पविधिना समलङ्कृतोऽपि ।
नारीजनः प्रियमुपैति न तावदग्र्यां
यावन्न पट्टमयवस्त्रयुगानि धत्ते ॥ २० ॥

स्पर्शवता वर्णान्तरविभागचित्रेण नेत्रसुभगेन ।
यैः सकलमिदं क्षितितलमलङ्कृतं पट्टवस्त्रेण ॥ २१ ॥

विद्याधरीरुचिरपल्लवकर्णपूर-
वातेरितास्थिरतरं प्रविचिन्त्य लोकम् ।
मानुष्यमर्थनिचयांश्च तथा विशालां-
स्तेषां शुभा मतिरभूदचला ततस्तु ॥ २२ ॥

चतुःसमुद्रान्तविलोलमेखलां
सुमेरुकैलासबृहत्पयोधराम् ।
वनान्तवान्तस्फुटपुष्पहासिनीं
**कुमारगुप्ते** पृथिवीं प्रशासति ॥ २३ ॥

समानधीः शुक्रबृहस्पतिभ्यां
ललामभूतो भुवि पार्थिवानाम् ।
रणेषु यः पार्थसमानकर्मा
बभूव गोप्ता नृप**विश्ववर्मा** ॥ २४ ॥

दीनानुकम्पनपरः कृपणार्तवर्ग-
सन्धाप्रदोऽधिकदयालुरनाथनाथः ।
कल्पद्रुमः प्रणयिनामभयप्रदश्च
भीतस्य यो जनपदस्य च बन्धुरासीत् ॥ २५ ॥

तस्यात्मजः स्थैर्यनयोपपन्नो
बन्धुप्रियो बन्धुरिव प्रजानाम् ।
बन्ध्वर्तिहर्ता नृपबन्धुवर्मा
द्विड्दृप्तपक्षक्षपणैकदक्षः ॥ २६ ॥

कान्तो युवा रणपटुर्विनयान्वितश्च
राजापि सन्नुपसृतो न मदैः स्मयाद्यैः ।
शृङ्गारमूर्तिरभिभात्यनलङ्कृतोऽपि
रूपेण यः कुसुमचाप इव द्वितीयः ॥ २७ ॥

वैधव्यतीव्रव्यसनक्षतानां
स्मृत्वा यमद्याप्यरिसुन्दरीणाम् ।
भयाद्भवत्यायतलोचनानां
घनस्तनायासकरः प्रकम्पः ॥ २८ ॥

तस्मिन्नेव क्षितिपतिवृषे बन्धुवर्मण्युदारे
सम्यक्स्फीतं दशपुरमिदं पालयत्युन्नतांसे ।
शिल्पावाप्तैर्धनसमुदयैः पट्टवायैरुदारं
श्रेणीभूतैर्भवनमतुलं कारितं दीप्तरश्मेः ॥ २९ ॥

विस्तीर्णतुङ्गशिखरं शिखरिप्रकाश-
मभ्युद्गतेन्द्वमलरश्मिकलापगौरम् ।
यद्भाति पश्चिमपुरस्य निविष्टकान्त-
चूडामणिप्रतिसमं नयनाभिरामम् ॥ ३० ॥

रामासनाथरचने दरभास्करांशु-
वह्निप्रतापसुभगे जललीनमीने ।

चन्द्रांशुहर्म्यतलचन्दनतालवृन्त-
हारोपभोगरहिते हिमदग्धपद्मे ॥ ३१ ॥
रोध्रप्रियङ्गुतरुकुन्दलताविकोश-
पुष्पासवप्रमुदितालिकलाभिरामे ।
काले तुषारकणकर्कशशीतवात-
वेगप्रनृत्तलवलीनगणैकशाखे ॥ ३२ ॥
स्मरवशगतरुणजनवल्लभाङ्गनाविपुलकान्तपीनोरु-
स्तनजघनघनालिङ्गननिर्भर्त्सिततुहिनहिमपाते ॥ ३३ ॥
**मालवानां** गणास्थित्या याते शतचतुष्टये ।
त्रिनवत्यधिकेऽब्दानामृतौ सेव्यघनस्व(स्त)ने ॥ ३४ ॥
सहस्यमासशुक्लस्य प्रशस्तेऽह्नि त्रयोदशे ।
मङ्गलाचारविधिना प्रासादोऽयं निवेशितः ॥ ३५ ॥
बहुना समतीतेन कालेनान्यैश्च पार्थिवैः ।
व्यशीर्यतैकदेशोऽस्य भवनस्य ततोऽधुना ॥ ३६ ॥
स्वयशोवृद्धये सर्वमत्युदारमुदारया ।
संस्कारितामिदं भूयः श्रेण्या भानुमतो गृहम् ॥ ३७ ॥
अत्युन्नतमवदातं नभःस्पृशन्निव* मनोहरैः शिखरैः ।
शशिभान्वोरभ्युदयेष्वमलमयूखायतनभूतम् ॥ ३८ ॥
वत्सरशतेषु पञ्चसु विंशत्यधिकेषु नवसु चाब्देषु ।
यातेष्वभिरम्यतपस्यमासशुक्लाद्वितीयायाम् ॥ ३९ ॥
स्पष्टैरशोकतरुकेतकसिन्दुवार-
लोलातिमुक्तकलतामदयन्तिकानाम् ।
पुष्पोद्गमैरभिनवैरधिगम्य नून-
मैक्यं विजृम्भितशरे हरपू(धू)तदेहे ॥ ४० ॥

---

*स्पृशदिव ।

मधुपानमुदितमधुकरकुलोपगीतनगणैकपृथुशाखे ।
काले नवकुसुमोद्गमदन्तुरकान्तप्रचुररोध्रे ॥ ४१ ॥
शशिनेव नभो विमलं कौस्तुभमणिनेव शार्ङ्गिणो वक्षः ।
भवनवरेण तथेदं पुरमखिलमलङ्कृतमुदारम् ॥ ४२ ॥
अमलिनशशिलेखादन्तुरं पिङ्गलानां
परिवहति समूहं यावदीशो जटानाम् ।
विकटकमलमालामंससक्तां च शार्ङ्गी
भवनमिदमुदारं शाश्वतं तावदस्तु ॥ ४३ ॥
श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः ।
पूर्वाचेयं प्रयत्नेन रचिता वत्सभट्टिना ॥ ४४ ॥
स्वस्ति कर्तृलेखकवाचकश्रोतृभ्यः । सिद्धिरस्तु ।

---

## No. 6.

### Mandasore Stone Pillar Inscription of Yas'odharman

**Not dated** ( of about 532 A. D. )

वेपन्ते यस्य भीमस्तनितभयसमुद्भ्रान्तदैत्या दिगन्ताः
शृङ्गाघातैः सुमेरोर्विघटितदृशदः कन्दरा यः करोति ।
उक्षाणं तं दधानः क्षितिधरतनयादत्तपञ्चाङ्गुलाङ्कं
द्राघिष्ठः शूलपाणेः क्षपयतु भवतां शत्रुतेजांसि केतुः ॥ १ ॥
आविर्भूतावलेपैरविनयपटुभिर्लङ्घिताचारमार्गै-
र्मोहादैदंयुगीनैरपशुभरातिभिः पीड्यमाना नरेन्द्रैः ।
यस्य क्ष्मा शार्ङ्गपाणेरिव कठिनधनुर्ज्याकिणाङ्कप्रकोष्ठं
बाहुं लोकोपकारव्रतसफलपरिस्पन्दधीरं प्रपन्ना ॥ २ ॥
निन्द्याचारेषु योऽस्मिन्विनयमुषियुगे कल्पनामात्रवृत्त्या
राजस्वन्येषु पांसुष्विव कुसुमबलिर्नाविभाषे प्रयुक्तः ।

स श्रेयोधाम्नि सम्राडिति मनुभरतालर्कमान्धातृकल्पे
कल्याणे हेम्नि भास्वान्मणिरिव सुतरां भ्राजते यत्र शब्दः॥ ३

ये भुक्ता **गुप्तनाथैर्न** सकलवसुधाक्रान्तिदृष्टप्रतापै-
र्नाज्ञा **हूणाधिपानां** क्षितिपतिमुकुटाध्यासिनी यान्प्रविष्टा।
देशांस्तान्धन्वशैलद्रुमगहनसरिद्वीरबाहूपगूढा-
न्वीर्यावस्कन्नराज्ञः स्वगृहपरिसरावज्ञया यो भुनक्ति ॥ ४ ॥

आ**लौहित्यो**पकण्ठात्तलवनगहनोपत्यकादा**महेन्द्रा**-
दा**गङ्गा**श्लिष्टसानोस्तु**हिनशिखरिणः पश्चिमादापयोधेः**।
सामन्तैर्यस्य बाहुद्रविणहृतमदैः पादयोरानमद्भि-
श्चूडारत्नांशुराजिव्यतिकरशबला भूमिभागाः क्रियन्ते ॥ ५ ॥

स्थाणोरन्यत्र येन प्रणतिकृपणतां प्रापितं नोत्तमाङ्गं
यस्याश्लिष्टो भुजाभ्यां वहति **हिमगिरि**र्दुर्गशब्दाभिमानम्।
नीचैस्तेनापि यस्य प्रणतिभुजबलावर्जनक्लिष्टमूर्ध्ना
चूडापुष्पोपहारै**र्मिहिरकुल**नृपेणार्चितं पादयुग्मम् ॥ ६ ॥

गामेवोन्मातुमूर्ध्वं विगणयितुमिव ज्योतिषां चक्रवालं
निर्देष्टुं मार्गमुच्चैर्दिव इव सुकृतोपार्जितायाः स्वकीर्तेः।
तेनाकल्पान्तकालावधिरवनिभुजा श्री**यशोधर्मणा**यं
स्तम्भः स्तम्भाभिरामास्थिरभुजपरिघेणोच्छ्रितिं नायितोऽत्र ७

श्लाघ्ये जन्मास्य वंशे चरितमघहरं दृश्यते कान्तमस्मि-
न्धर्मस्यायं निकेतश्चलति नियमितं नामुनालोकवृत्तम्।
इत्युत्कर्षं गुणानां लिखितुमिव **यशोधर्मण**श्चन्द्रबिम्बे
रागादुत्क्षिप्त उच्चैर्भुज इव रुचिमान्यः पृथिव्या विभाति॥८॥

इति तुष्टूषया तस्य नृपतेः पुण्यकर्मणः।
**वासुले**नोपरचिताः श्लोकाः कक्कस्य सूनुना ॥९ ॥

उत्कीर्णा प्रशास्तिर्गोविन्देन।

---

## No. 7.

# Mandasore Stone Inscription of Yas'odharman and Vishnuvardhan

## of Malava Saṁ 589 ( 532 A. D. )

स जयति जगतां पतिः पिनाकी
　स्मितरवगीतिषु यस्य दन्तकान्तिः ।
द्युतिरिव तडितां निशि स्फुरन्ती
　तिरयति च स्फुटयत्यदश्च विश्वम् ॥ १ ॥
स्वयंभूर्भूतानां स्थितिलयसमुत्पत्तिविधिषु
　प्रयुक्तो येनाज्ञां वहति भुवनानां विधृतये ।
पितृत्वं चानीतो जगति गरिमाणं गमयता
　स शम्भुर्भूयांसि प्रतिदिशतु भद्राणि भवताम् ॥ २ ॥
फणिमणिगुरुभाराक्रान्तिदूरावनम्रं
　स्थगयति रुचमिन्दोर्मण्डलं यस्य मूर्ध्नाम् ।
स शिरसि विनिबध्नन् रन्ध्रिणीमस्थिमालां
　सृजतु भवसृजो वः क्लेशभङ्गं भुजङ्गः ॥ ३ ॥
षष्ट्या सहस्रैः सगरात्मजानां
　खातः खतुल्यां रुचमादधानः ।
अस्योदपानाधिपतेश्चिराय
　यशांसि पायात्पयसां विधाता ॥ ४ ॥
अथ जयति जनेन्द्रः श्री **यशोधर्म**नामा
　प्रमदवनमिवान्तः शत्रुसैन्यं विगाह्य ।
व्रणकिसलयभङ्गैर्योऽङ्गभूषां विधत्ते
　तरुणतरुलतावद्वीरकीर्तिर्विनाम्य ॥ ५ ॥
आजौ जिती विजयते जगतीं पुनश्च
　श्री**विष्णुवर्धन**नराधिपतिः स एव ।

प्रख्यात **औलिकरलाञ्छन** आत्मवंशो
येनोदितोदितपदं गमितो गरीयः ॥ ६ ॥

प्राचो नृपान्सुबृहतश्च बहूनुदीचः
साम्ना युधा च वशगान्प्रविधाय येन ।
नामापरं जगति कान्तमदो दुरापं
राजाधिराज परमेश्वर इत्युदूढम् ॥ ७ ॥

स्निग्धश्यामाम्बुदाभैः स्थगितदिनकृतो यज्वनामाज्यधूमै-
रम्भोमेध्यं मघोनावधिषु विदधता गाढसम्पन्नसस्याः ।
संहर्षाद्वाणिनीनां कररभसहृतोद्यानचूताङ्कुराग्रा
राजन्वन्तो रमन्ते भुजविजितभुवा भूरयो येन देशाः ॥ ८ ॥

यस्योत्केतुभिरुन्मदद्विपकरव्याविद्धलोध्रद्रुमै-
रुद्धूतेन वनाध्वानि ध्वनिनदद्विन्ध्याद्रिरन्ध्रैर्बलैः ।
बालेयच्छविधूमरेणुरजसा मन्दांशु संलक्ष्यते
पर्यावृत्तशिखण्डिचन्द्रक इव ध्यामं रवेर्मण्डलम् ॥ ९ ॥

तस्य प्रभोर्वंशकृतां नृपाणां
पादाश्रयाद्विश्रुतपुण्यकीर्तिः ।
भृत्यः स्वनैभृत्यजितारिषट्क
आसीद्वसीयान्किल षष्ठिदत्तः ॥ १० ॥

**हिमवत** इव गाङ्गस्तुङ्गनम्रः प्रवाहः
शशभृत इव **रेवा**वारिराशिः प्रथीयान् ।
परमभिगमनीयः शुद्धिमानन्ववायो
यत उदितगरिम्णस्तायते **नैगमानाम्** ॥ ११ ॥

तस्यानुकूलः कुलजात्कलत्रा-
त्सुतः प्रसूतो यशसां प्रसूतिः ।
हरेरिवांशं वशिनं वराहं
वराहदासं यमुदाहरन्ति ॥ १२ ॥

सुकृतिविषयितुङ्गं रूढमूलं धरायां
स्थितिमपगतभङ्गां स्थेयसीमादधानम् ।
गुरुशिखरमिवाद्रेस्तत्कुलं स्वात्मभूत्या
रविरिव रविकीर्तिः सुप्रकाशं व्यधत्त ॥ १३ ॥

बिभ्रता शुभ्रमभ्रंशि स्मार्तं वर्त्मोचितं सताम् ।
न विसंवदिता येन कलावपि कुलीनता ॥ १४ ॥

धुतधीदीधितिध्वान्तान्हविर्भुज इवाध्वरान् ।
भानुगुप्ता ततः साध्वी तनयांस्त्रीनजीजनत् ॥ १५ ॥

भगवद्दोष इत्यासीत्प्रथमः कार्यवर्त्मसु ।
आलम्बनं बान्धवानामन्धकानामिवोद्धवः ॥ १६ ॥

बहुनयविधिवेधा गह्वरेऽप्यर्थमार्गे
विदुर इव विदूरं प्रेक्षया प्रेक्षमाणः ।
वचनरचनबन्धे संस्कृतप्राकृते यः
कविभिरुदितरागं गीयते गीरभिज्ञः ॥ १७ ॥

प्रणिधिदृगनुगन्त्रा यस्य बौद्धेन चाक्ष्णा
न निशि तनुदवीयो वास्त्यदृष्टं धारित्र्याम् ।
पदमुदायि दधानोऽनन्तरं तस्य चाभू-
त्स भयमभयदत्तो नाम चिन्वन्प्रजानाम् ॥ १८ ॥

विन्ध्यस्यावन्ध्यकर्मा शिखरतटपतत्पाण्डुरेवाम्बुराशे-
र्गोलाङ्गूलैः सहेलं प्लुतिनमिततरोः पारियात्रस्य चाद्रेः ।
आ सिन्धोरन्तरालं निजशुचिसचिवाध्यासितानेकदेशा-
न्राजस्थानीयवृत्त्या सुरगुरुरिव यो वर्णिनां भूतयेऽपात् ॥ १९ ॥

विहितसकलवर्णासङ्करं शान्तडिम्बं
कृत इव कृतमेतद्येन राज्यं निराधि ।
स धुरमयमिदानीं दोषकुम्भस्य सूनु-
र्गुरु वहति तदूढां धर्मतो धर्मदोषः ॥ २० ॥

स्वसुखमनतिवाञ्छन्दुर्गमेऽध्वन्यसङ्गां
धुरमतिगुरुभारां यो दधद्भर्तुरर्थे ।
वहति नृपतिवेशं केवलं लक्ष्ममात्रं
वलिनमिव विलम्बं कम्बलं बाहुलेयः ॥ २१ ॥

उपहितहितरक्षामण्डनो जातिरत्नै-
र्भुज इव पृथुलांसस्तस्य दक्षः कनीयान् ।
महदिदमुदपानं खातयामास बिभ्र-
च्छ्रुतिहृदयनितान्तानन्दि निर्दोषनाम ॥ २२ ॥

सुखाश्रेयच्छायं परिणतिहितस्वादुफलदं
गजेन्द्रेणारुग्णं द्रुममिव कृतान्तेन बलिना ।
पितृव्यं प्रोद्दिश्य प्रियमभयदत्तं पृथुधिया
प्रथीयस्तेनेदं कुशलमिह कर्मोपरचितम् ॥ २३ ॥

पञ्चसु शतेषु शरदां यातेष्वेकान्नवति सहितेषु ।
मालवगणस्थितिवशात्कालज्ञानाय लिखितेषु ॥ २४ ॥

यस्मिन्काले कलमृदुगिरां कोकिलानां प्रलापा
भिन्दन्तीव स्मरशरनिभाः प्रोषितानां मनांसि ।
भृङ्गालीनां ध्वनिरनुवनं भारमन्द्रश्च यस्मि-
न्नाधूतज्यं धनुरिव नदच्छ्रूयते पुष्पकेतोः ॥ २५ ॥

प्रियतमकुपितानां रामयन्बद्धरागं
किसलयमिव मुग्धं मानसं मानिनीनाम् ।
उपनयति नभस्वान्मानभङ्गाय यस्मि-
न्कुसुमसमयमासे तत्र निर्मापितोऽयम् ॥ २६ ॥

यावत्तुङ्गैरुदन्वान्किरणसमुदयं सङ्गकान्तं तरङ्गै-
रालिङ्गन्निन्दुबिम्बं गुरुभिरिव भुजैः संविधत्ते सुहृत्ताम् ।
बिभ्रत्सौधान्तलेखावलयपरिगतिं मुण्डमालामिवायं
सत्कूपस्तावदास्ताममृतसमरसस्वच्छविष्यन्दिताम्बुः ॥ २७ ॥

धीमान्दक्षो दक्षिणः सत्यसन्धो
ह्रीमाञ्छूरो वृद्धसेवी कृतज्ञः ।
बद्धोत्साहः स्वामिकार्येष्वखेदी
निर्दोषोऽयं पातु धर्मं चिराय ॥ २८ ॥
उत्कीर्णा गोविन्देन ।

---

## No. 8.

## Haraha Stone Inscription of Is'ānavarman of Malava Saṁvat 611 ( 555 A. D. )

लोकाविष्कृतिसंक्षयस्थितिकृतां यः कारणं वेधसां
ध्वस्तध्वान्तचयाः परास्तरजसो ध्यायन्ति यं योगिनः ।
यस्यार्द्धस्थितयोषितोऽपि हृदये नास्थायि चेतोभुवा
भूतात्मा त्रिपुरान्तकः स जयति श्रेयःप्रसूतिर्भवः ॥ १ ॥
आशोणां फणिनः फणोपलरुचा सैंहीं वसानं त्वचं
शुभ्रां लोचनजन्मना कपिशयद्भासा कपालावलीम् ।
तन्वीं ध्वान्तनुदं मृगाकृतिभृतो बिभ्रत्कलां मौलिना
दिश्यादन्धकविद्विषः स्फुरदहि स्थेयः पदं वो वपुः ॥ २ ॥
सुतशतं लेभे नृपोऽश्वपतिर्वैवस्वताद्यद्गुणोदितम् ।
तत्प्रसूता दुरितवृत्तिरुधो मुखराः क्षितीशाः क्षतारयः ॥ ३ ॥
तेष्वादौ हरिवर्मणोऽवनिभुजो भूतिर्भुवो भूतये
रुद्धाशेषदिगन्तरालयशसा रुग्णारिसंपत्त्विषा ।
सङ्ग्रामे हुतभुक्प्रभाकपिशितं वक्त्रं समीक्ष्यारिभि-
र्यो भीतैः प्रणतस्ततश्च भुवने ज्वालामुखाख्यां गतः ॥ ४ ॥
लोकस्थितीनां स्थितये स्थितस्य
मनोरिवाचारविवेकमार्गे ।

जगाहिरे यस्य जगन्ति रम्याः
सत्कीर्तयः कीर्तयितव्यनाम्नः ॥ ५ ॥

तस्मात्पयोधेरिव शीतरश्मि-
रादित्यवर्मा नृपतिर्बभूव ।
वर्णाश्रमाचारविधिप्रणीते-
र्यं प्राप्य साफल्यमियाय धाता ॥ ६ ॥

हुतभुजि मखमध्यासङ्गिनि ध्वान्तनीलं
वियति पवनजन्मभ्रान्तिविक्षेपभूयः ।
मुखरयति समन्तादुत्पतद्धूमजालं
शिखिकुलमुरुमेघाशङ्कि यस्य प्रसक्तम् ॥ ७ ॥

तेनापीश्वरवर्मणः क्षितिपतेः क्षत्रप्रभावाप्तये
जन्माकारि कृतात्मनः क्रतुगणेष्वाहूतवृत्रद्विषः ।
यस्योत्खातकलिस्वभावचरितस्याचारमार्गं नृपा
यत्नेनापि ययातितुल्ययशसो नान्येऽनुगन्तुं क्षमाः ॥ ८ ॥

नीत्या शौर्यं विशालं सुहृदमकुटिलेनोत्तमेच्छां कुलेन
त्यागं पात्रेण वित्तप्रभवमपि ह्रिया यौवनं संयमेन ।
वाचं सत्येन चेष्टां श्रुतिपथविधिना प्रश्रयेणोत्तमर्द्धिं
यो बध्नन्नैव खेदं व्रजति कलिमयध्वान्तमग्नेऽपि लोके ॥ ९ ॥

यस्येज्यास्वनिशं यथाविधि हुतज्योतिर्ज्वलज्जन्मना
धूमेनाञ्जनभङ्गमेचकरुचा दिक्चक्रवाले तते ।
आयाता नववारिभारविनमन्मेघावली प्रावृडि-
त्युन्मादोद्धतचेतसः शिखिगणा वाचालतामाययुः ॥ १० ॥

तस्मात्सूर्य इवोदयाद्रिशिरसो धातुर्मरुत्वानिव
क्षीरोदादिव तर्जितेन्दुकिरणः कान्तप्रभः कौस्तुभः ।
भूतानामुदपद्यत स्थितिकरः स्थेष्ठं महिम्नः पदं
राजन्राजकमण्डलाम्बरशशी श्रीशानवर्मा नृपः ॥ ११ ॥

लोकानामुपकारिणारिकुमुदव्यालुप्तकान्तिश्रिया
मित्रास्याम्बुरुहाकरद्युतिकृता भूरिप्रतापत्विषा ।
येनाच्छादितसत्पथं कलियुगध्वान्तावमग्नं जग-
त्सूर्येणेव समुद्यता कृतमिदं भूयः प्रवृत्तक्रियम् ॥ १२ ॥

जित्वान्ध्राधिपतिं सहस्रगणितत्रेधाक्षरद्वारणं
व्यावल्गन्नियुतातिसंख्यतुरगान्भङ्क्त्वा रणे शूलिकान् ।
कृत्वा चायतिमोचितस्थलभुवो गौडान्समुद्राश्रया-
नध्यासिष्ट नतक्षितीशचरणः सिंहासनं यो जिती ॥ १३ ॥

प्रस्थानेषु बलार्णवाभिगमनक्षोभस्फुटद्भूतल-
प्रोद्भूतस्थगितार्कमण्डलरुचा दिग्व्यापिना रेणुना ।
यस्यामूढादिनादिमध्यविरतौ लोकेऽन्धकारीकृते
व्यक्तिं नाडिकयैव यान्ति जयिनो यामास्त्रियामास्विव ॥ १४ ॥

प्रविशती कलिमारुतघट्टिता
क्षितिरलक्ष्यरसातलवारिधौ ।
गुणशतैरवबध्य समन्ततः
स्फुटितनौरिव येन बलाद्धृता ॥ १५ ॥

ज्याघातव्रणरूढिकर्कशभुजा व्याकृष्टशार्ङ्गच्युता-
न्यस्यावाप्य पतत्रिणो रणमखे प्राणानमुञ्चन्द्विषः ।
यस्मिन्शासति च क्षितिं क्षितिपतौ जातेव भूयस्त्रयी
तेन ध्वस्तकलिप्रवृत्तितिमिराः श्रीसूर्यवर्माजनि ॥ १६ ॥

यो बालेन्दुसकान्ति कृत्स्नभुवनप्रेयो दधद्यौवनं
शान्तः शास्त्रविचारणाहितमनाः पारं कलानां गतः ।
लक्ष्मीकीर्तिसरस्वतीप्रभृतयो यं स्पर्धयेवाश्रिता
लोके कामितकामिभावरसिकः कान्ताजनो भूयसा ॥ १७ ॥

सद्वृत्तेन बलात्कलेरवनतिस्तावत्प्रवृद्धात्मनो
बाणैस्तावदवस्थितं स्मृतिभुवः कान्ताशरीरक्षतौ ।

लक्ष्म्यां तावदकाण्डभङ्गजभयं त्यक्तं परापाश्रयं
यावन्नाविरकारि यस्य जनताकान्तं वपुर्वेधसा ॥ १८ ॥

लक्ष्म्यः शत्रुभुवः कुचग्रहभयावेशभ्रमल्लोचना
येनाकृष्य भुजेन विस्फुरदसिज्योतिःकलासङ्गिना ।
कान्ता मन्मथिनेव कामितविदा गाढं निपीड्योरसा
प्रायेणान्यमनुष्यसंश्रयकृतं भावं परित्याजिता ॥ १९ ॥

तेनानतोन्नातिकृता मृगयागतेन
दृष्ट्वाद्यमन्धकभिदो भवनं विशीर्णम् ।
स्वेच्छासमुन्नतमकारि ललाम भूमेः
**क्षेमेश्वर**प्रथितनाम शशाङ्कशुभ्रम् ॥ २० ॥

एकादशातिरिक्तेषु षट्सु शातितविद्विषि ।
शतेषु शरदां पत्यौ भुवः **श्रीशानवर्म**णि ॥ २१ ॥

यस्मिन्कालेऽम्बुवाहा नवगवलरुचः प्रान्तलग्नेन्द्रचापा-
स्तन्वन्त्याशावितानं स्फुरदुरुतडितः सान्द्रधीरं क्वणन्तः ।
वाताश्चावान्ति नीपान्नवकुसुमचयानम्रमूर्ध्नो धुनाना-
स्तस्मिन्मुक्ताम्बुमेघद्युति भवनमदो निर्मितं शूलपाणेः ॥ २२ ॥

कुमारशान्तेः पुत्रेण गर्गराकटवासिना ।
नृपानुरागात्पूर्वेयमकारि **रविशान्तिना** ॥ २३ ॥

उत्कीर्णा मिहिरवर्मणा ।

---

## No. 9.
## Valabhi Copperplate Inscription of Dharasena ( I ) of Gupta-Valabhi Saṁ 269
( 588 A. D. )

स्वस्ति। विजयस्कन्धावाराद्भद्रपत्तनवासकात्प्रसभप्रणवतामित्राणां **मैत्रकाणा**मतुलबलसपत्नमण्डलाभोगसंसक्तसंप्रहारशतलब्धप्रतापः प्रतापोपनतदानमानार्जवोपार्जितानुरागानुरक्तमौलभृतश्रेणिबलावाप्तराज्यश्रीः परममाहेश्वरः श्रीसेनापति**भटार्कः**,

तस्य सुतस्तत्पादरजोरुणावनतपवित्रीकृतशिराः शिरोवनतशत्रुचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधितिर्दीनानाथकृपणजनोपजीव्यमानविभवः परममाहेश्वरः श्रीसेनापति**धरसेनः**,

तस्यानुजस्तत्पादप्रणामप्रशस्ततरविमलमणिर्मन्वादिप्रणीताविधिविधानधर्मा धर्मराज इव विनयव्यवस्थापद्धतिरखिलभुवनमण्डलाभोगैकस्वामिना परमस्वामिना स्वयमुपाहितराज्याभिषेको महाविश्राणनावपूतराज्यश्रीः परममाहेश्वरो महाराजश्री**द्रोणसिंहः**,

सिंह इव तस्यानुजः स्वभुजबलपराक्रमेण परगजघटानीकानामेकविजयी शरणैषिणां शरणमवबोद्धा शास्त्रार्थतत्त्वानां कल्पतरुरिव सुहृत्प्रणयिनां यथाभिलषितकामफलभोगदः परमभागवतो महाराजश्री**ध्रुवसेनः**,

तस्यानुजस्तच्चरणारविन्दप्रणतिप्रविधौताशेषकल्मषः सुविशुद्धस्वचरितोदकप्रक्षालिताशेषकालिकलङ्कः प्रसभनिर्जितारातिपक्षप्रथितमहिमा परमादित्यभक्तः श्रीमहाराज**धरपट्टः**,

तस्य सुतस्तत्पादसपर्यावाप्तपुण्योदयः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्वानिकषस्तत्प्रभावप्रणताराति-चूडारत्नप्रभासंसक्तसव्यपादनखपङ्क्तिदीधितिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनादन्वर्थराजशब्दो रूपकान्तिस्थैर्यधैर्यबुद्धि-

सम्पाद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलः प्रार्थनाधिकार्थप्रदानान्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरो महाराज श्री**गुहसेनः**,

तस्य सुतस्तत्पादनखमयूखसन्तानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानभोगसम्पद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्द्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मदायानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहताराातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरो महासामन्तमहाराजश्री**धरसेनः** कुशली सर्वानेव स्वानायुक्तकद्राङ्गिकमहत्तरचाटभट [शौल्किक] ध्रुवाधिकरणिकविषयपतिराजस्थानीयोपरिककुमारामात्यहस्त्यश्वारोहादीनन्यांश्च यथासंबध्यमानकान्समाज्ञापयति ।

अस्तु वस्संविदितं यथा मया मातापित्रोः पुण्याप्यायनायात्मनश्चैहिकामुष्मिकयथाभिलषितफलावाप्तये **वलभ्या**माचार्यभदन्त**स्थिरमति**कारितश्री**बप्पपादीयविहारे** भगवतां बुद्धानां पुष्पधूपगन्धदीपतैलादिक्रियोत्सर्पणार्थं नानादिगभ्यागतार्यभिक्षुसङ्घस्य च चीवरपिण्डपातग्लानभैषजाद्यर्थं विहारस्य च खण्डस्फुटितविशीर्णप्रतिसंस्करणार्थं **हस्तवप्राहरण्यां महेश्वरदासेनकग्रामो धाराखेटस्थल्यां** च **देवभद्रिपल्लिकाग्रामः** सोद्रङ्गौ सोपरिकरौ सवातभूतप्रत्यायौ सधान्यभागभोगहिरण्यादेयौ सोत्पद्यमानविष्टिकौ सदशापराधौ समस्तराजकीयानामहस्तप्रक्षेपणीयौ भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवसारित्क्षितिस्थितिपर्वतसमकालीनौ उदकातिसर्गेण देवदायौ निसृष्टौ । यत उचितया देवविहारस्थित्या भुञ्जतः कृषतः कर्षयतः प्रतिदिशतो वा न कैश्चिद्व्याघाते वर्तितव्यौ । आगामिभद्रनृपतिभिरस्मद्वंशजैरन्यैर्वानित्या-

न्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च । यश्चैनमाच्छिद्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्महापातकैस्सोपपातकैः संयुक्तः स्यादित्युक्तं च भगवता वेदव्यासेन व्यासेन ।

षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥ १ ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २ ॥
अनोदकेष्वरण्येषु शुष्ककोटरवासिनः ।
कृष्णसर्पा हि जायन्ते धर्मदायापहारकाः ॥ ३ ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।
गवां शतसहस्रस्य हन्तुः प्राप्नोति किल्बिषम् ॥ ४ ॥
यानीह दारिद्र्यभयान्नरेन्द्रै-
धनानि धर्मायतनीकृतानि ।
निर्माल्यवान्तप्रतिमानि तानि
को नाम साधुः पुनराददीत ॥ ५ ॥
लक्ष्मीनिकेतं यदपाश्रयेण
प्राप्तो नु कोऽभिमतं नृपार्थं ।
तान्येव पुण्यानि विवर्धयेथा
न हापनीयो ह्युपकारिपक्षः ॥ ६ ॥

स्वहस्तो मम महाराजश्री**धरसेन**स्य । दूतकः सामन्तशीलादित्यः । लिखितं सन्धिविग्रहाधिकरणाधिकृतादिविरपतिस्कन्दभटेन । सं. २६९ चैत्र ब. २ ।

---

## No. 10.

## Camboja Stone Inscription of Bhavavarman

**Not dated** ( of about 600 A. D. ).

जितमिन्दुवतंसेन मूर्ध्ना गङ्गां बभार यः ।
उमाभ्रूभङ्गजिह्मोर्मि मालामालु (?) मिवामलाम् ॥ १ ॥

राजा श्री**भववर्मे**ति पतिरासीन्महीभृताम् ।
अप्रधृष्यमहासत्त्वस्तुङ्गो मेरुरिवापरः ॥ २ ॥

सोमान्वये प्रसूतस्य सोमस्येव पयोनिधौ ।
केनापि यस्य तेजस्तु जाज्वलीति सदाहवे ॥ ३ ॥

अन्तः समुत्था दुर्ग्राह्या मूर्त्यभावादतीन्द्रियाः ।
यदा षडरयो येन जिता बाह्येषु का कथा ॥ ४ ॥

नित्यदानपयःसिक्तकरानेव मतङ्गजान् ।
आत्मानुकारादिव यः समराय समग्रहीत् ॥ ५ ॥

शरत्कालाभियातस्य परानावृततेजसः ।
द्विषामसह्यो यस्यैव प्रतापो न रवेरपि ॥ ६ ॥

यस्य सेनारजो धूतमुज्झितालंकृतिष्वपि ।
रिपुस्त्रीगण्डदेशेषु चूर्णभावमुपागतम् ॥ ७ ॥

रिपोरिव मनः शुष्कं नगरीपरिखाजलम् ।
यस्य योधैमरापीतमासद्रै रतिना (?) सह ॥ ८ ॥

परीतायामपि पुरि ज्वलता यस्य तेजसा ।
पुनरुक्त इवारोपः प्राकारे जातवेदसः ॥ ९ ॥

जित्वा पर्वतभूपालांस्तनोति सकुला भुवः ।
बान्दिभिः सगुणानीशै (?) र्यशोभिरिव यो दिशः ॥ १० ॥

येनेयद्दूरवंश्यानां मर्यादालङ्घनं कृतम् ।
यद्देषामवधिर्भूमेरतिक्रान्ता पराक्रमैः ॥ ११ ॥

शक्त्यापि पूर्वं विजिता भूमिरम्बुधिमेखला ।
प्रभुत्वे क्षमया येन सैव पश्चादजीयत ॥ १२ ॥
यस्याकृष्टाः प्रभावेण परे युध्यजिता अपि ।
राजश्रियमुपादाय नमन्ति चरणाम्बुजे ॥ १३ ॥
परेणाक्रान्तपूर्वेयमखिलेति विचिन्तया ।
अजित्वाम्भोधिपर्यन्तामवनिं यो न शाम्यति ॥ १४ ॥
अवाप्य षोडश कलाः शशाङ्को याति पूर्णताम् ।
असंख्या अपि यो लब्ध्वा न पर्यस्तः कदाचन ॥ १५ ॥
नास्ति सर्वगुणः कश्चिदिति वाक्यं महाधियाम् ।
येनासीद्विकृतामिदं ( ? ) स्वेनापि वचसा विना ॥ १६ ॥
तस्य राजाधिराजस्य नवेन्दुरिव यः सुतः ।
गुणकान्त्यादिभिर्योगादुन्नेत्रयति यः प्रजाः ॥ १७ ॥
रागं दधाति भूपानां ᵕ — रतमरीचयः ।
यस्य .................... ॥ १८ ॥
शैवं पदं गते राज्ञि दृष्ट्वा यमुदितं प्रजाः ।
मुञ्चन्ति युगपद्बाष्पं शोकानन्दसमुद्भवम् ॥ १९ ॥
.............................. ।
........................... ॥ २० ॥
नवे वयसि वृत्तस्य यस्य राज्यभरोद्यतम् ।
चित्रायते कुमारस्य सैनान्यं मरुतामिव ॥ २१ ॥
उपधाशुद्धिमान्भृत्यस्तयोरवनिपालयोः ।
........................... ॥ २२ ॥
.............................. ।
........................... ॥ २३ ॥
हैमौ करङ्ककलशावित्यादिश्रियमुत्तमाम् ।
यो लब्धवान्प्रसादेन स्वामिनोरुभयोरपि ॥ २४ ॥

न किंचित्स्वाम्यसंभुक्तमाप्नं येन कदाचन ।
भोजनं वसनं — — यानाद्याभरणानि वा ॥ २५ ॥
प्राणैरसारलघुभिः पितृपिण्डविवर्धितः ।
स्वामिनोऽर्थे गुरुस्थेयं क्रतुमैहत यो यमम् (?) ॥ २६ ॥
लक्ष्म्या गाढोपगूढोऽपि पूर्वाभ्यासबलेन यः ।
मुनीनां चरितं धत्ते क्षमाशमपरायणः ॥ २७ ॥
सुप्रकाशितशौर्यस्य सङ्ग्रामत्यागयोरपि ।
भीरुत्वं यस्य विख्यातमकीर्तेर्वृजिनादपि ॥ २८ ॥
प्रीणयन्नुद्य ◡ ◡ — रुचं कुर्वन्द्विषामपि ।
पक्षद्वयं यो मित्रत्वमनयद्गुणसंपदा ॥ २९ ॥
कलिना बलिना धर्मो भग्नैकचरणोऽपि यम् ।
महास्तम्भमिवालम्ब्य चतुष्पादिव सुस्थितः ॥ ३० ॥
अशाश्वतीत्यनादृत्य तनुश्रियमिवात्मनः ।
यशःपुण्यमयीमेव यः स्थिरां बह्वमन्यत ॥ ३१ ॥
इदमुग्रपुराधीशः सुभक्त्या लिङ्गमैश्वरम् ।
प्रतिष्ठापितवानत्र श्रीभद्रेश्वरसंज्ञकम् ॥ ३२ ॥
दासगोक्षेत्रहेमादिदेयद्रव्यमशेषतः ।
प्रमाणमिह ते सन्तु यतयो देवयाजकाः ॥ ३३ ॥
बान्धवा यजमानस्य पुत्राः संबन्धिनोऽपि च ।
देवस्वं नोपभुञ्जीरन्न प्रमाणि (?) भवन्ति च ॥ ३४ ॥
यद्दत्तमस्मै देवाय यजमानेन भक्तितः ।
ये नरा हर्तुमिच्छन्ति ते यान्तु नरकं चिरम् ॥ ३५ ॥

---

## No. 11.

## Banskhera Copperplate Inscription of Harsha. of Harsha Samvat 22. ( 628 A. D. ).

ओं स्वस्ति । महानौहस्त्यश्वजयस्कन्धावाराच्छ्रीवर्धमानकोट्या महाराजश्री**नरवर्धन**स्तस्य पुत्रस्तत्पादानुध्यातः श्री**वज्रिणी**देव्यामुत्पन्नः परमादित्यभक्तो महाराजश्री**राज्यवर्धन**स्तस्य पुत्रस्तत्पादानुध्यातः श्री**मदप्सरो**देव्यामुत्पन्नः परमादित्यभक्तो महाराजश्री**मदादित्यवर्धन**स्तस्य पुत्रस्तत्पादानुध्यातः श्री**महासेनगुप्ता**देव्यामुत्पन्नश्चतुस्समुद्रातिक्रान्तकीर्तिः प्रतापानुरागोपनतान्यराजो वर्णाश्रमव्यवस्थापनप्रवृत्तचक्र एकचक्ररथ इव प्रजानामार्तिहरः परमादित्यभक्तः परमभट्टारकमहाराजाधिराजश्री**प्रभाकरवर्धन**स्तस्य पुत्रस्तत्पादानुध्यातः स्मितयशःप्रतानविच्छुरितसकलभुवनमण्डलः परिगृहीतधनदवरुणेन्द्रप्रभृतिलोकपालतेजाः सत्पथोपार्जितानेकद्रविणभूमिप्रदानसंप्रीणितार्थिहृदयोतिशयितपूर्वराजचरितो देव्याममलयशोमत्यां श्री**यशोमत्या**मुत्पन्नः परमसौगतः सुगत इव परहितैकरतः परमभट्टारकमहाराजाधिराजश्री**राज्यवर्धनः** ।

राजानो युधि दुष्टवाजिन इव श्री**देवगुप्ता**दयः
कृत्वा येन कशाप्रहारविमुखाः सर्वे समं संयताः ।
उत्खाय द्विषतो विजित्य वसुधां कृत्वा प्रजानां प्रियं
प्राणानुज्झितवानरातिभवने सत्यानुरोधेन यः ॥ १ ॥

तस्यानुजस्तत्पादानुध्यातः परममाहेश्वरो महेश्वर इव सर्वसत्त्वानुकम्पी परमभट्टारकमहाराजाधिराजश्री**हर्षः अहिच्छत्राभुक्ता**वङ्गदीयवैषयिकपश्चिमपथकसम्बद्ध**मर्कटसागरे** समुपगतान्महासामन्तमहाराजदौस्साधसाधनिकप्रमातारराजस्थानीयकुमारामात्योपरिकविषयपतिभटचाटसेवकादीन्प्रतिवासिजानपदांश्च समाज्ञापयति—

विदितमस्तु यथायमुपरिलिखितग्रामः स्वसीमापर्यन्तः सोद्रङ्गः सर्वराजकुलाभाव्यप्रत्यायसमेतः सर्वपरिहृतपरिहारो विषयादुद्धृतपिण्डः

पुत्रपौत्रानुगश्चन्द्रार्कक्षितिसमकालीनो भूमिछिद्रन्यायेन मया पितुः परमभट्टारकमहाराजाधिराजश्री**प्रभाकरवर्धन**देवस्य मातुर्भट्टारिका-महादेवीराज्ञीश्री**यशोमती**देव्या ज्येष्ठभ्रातृपरमभट्टारकमहाराजाधिरा-जश्री**राज्यवर्धन**देवपादानां च पुण्ययशोभिवृद्धये भरद्वाजसगोत्रबह्वृच-च्छन्दोगसब्रह्मचारिभट्टवालचन्द्रभद्रस्वामिभ्यां प्रतिग्रहधर्मेणाग्रहारत्वेन प्रतिपादितो विदित्वा भवद्भिः समनुमन्तव्यः प्रतिवासिजानपदैरप्याज्ञा-श्रवणविधेयैर्भूत्वा यथासमुचिततुल्यमेयभागभोगकरहिरण्यादिप्रत्याया एतयोरेवोपनेयाः सेवोपस्थानं च करणीयमित्यपि च ।

अस्मत्कुलक्रममुदारमुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥ १ ॥
कर्मणा मनसा वाचा कर्तव्यं प्राणिभिर्हितम् ।
**हर्षेणै**तत्समाख्यातं धर्मार्जनमनुत्तमम् ॥ २ ॥

दूतकोऽत्र महाप्रमातारमहासामन्तश्रीस्कन्दगुप्तः । महाक्षपटलाधिकरणाधिकृतमहासामन्तमहाराजभानुसमादेशादुत्कीर्णमीश्वरेणेदमिति । संवत् २० २ कार्तिक वदि १ । स्वहस्तो मम महाराजाधिराजश्री-**हर्षस्य** ।

---

## No. 12.

## Aihole Stone Inscription of Pulikes'i II of S'aka yr. 556 and Bharata war yr. 3735 ( 634 A. D. )

जयति भगवाञ्जिनेन्द्रो वीतजरामरणजन्मनो यस्य ।
ज्ञानसमुद्रान्तर्गतमखिलं जगदन्तरीपमिव ॥ १ ॥
तदनु चिरमपरिमेयश्चलुक्यकुलविपुलजलनिधिर्जयति ।
पृथिवीमौलिललाम्नां यः प्रभवः पुरुषरत्नानाम् ॥ २ ॥
शूरे विदुषि च विभजन्दानं मानं च युगपदेकत्र ।
अविहितयाथासंख्यो जयति च **सत्याश्रयः** सुचिरम् ॥ ३ ॥
पृथिवीवल्लभशब्दो येषामन्वर्थतां चिरं यातः ।
तद्वंशेषु जिगीषुषु तेषु बहुष्वप्यतीतेषु ॥ ४ ॥
नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे
  नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे ।
लक्ष्मीर्भावितचापलापि च कृता शौर्येण येनात्मसा-
  द्राजासीज्**जयसिंहवल्लभ** इति ख्यातश्**चलुक्यान्वयः** ॥ ५ ॥
तदात्मजोऽभूद्**रणराग**नामा
  दिव्यानुभावो जगदेकनाथः ।
अमानुषत्वं किल यस्य लोकः
  सुप्तस्य जानाति वपुःप्रकर्षात् ॥ ६ ॥
तस्याभवत्तनूजः **पोलेकेशी** यः श्रितेन्दुकान्तिरपि ।
श्रीवल्लभोप्ययासीद्**वातापिपुरी**वधूवरताम् ॥ ७ ॥
यत्त्रिवर्गपदवीमलं क्षितौ
  नानुगन्तुमधुनापि राजकम् ।
भूश्च येन हयमेधयाजिना
  प्रापितावभृथमज्जनं बभौ ॥ ८ ॥

**नळमौर्यकदम्ब**कालरात्रि-
स्तनयस्तस्य बभूव **कीर्तिवर्मा** ।
परदारनिवृत्तचित्तवृत्ते-
रपि धीर्यस्य रिपुश्रियानुकृष्टा ॥ ९ ॥
रणपराक्रमलब्धजयश्रिया
सपदि येन विरुग्णमशेषतः ।
नृपतिगन्धगजेन महौजसा
**पृथुकदम्ब**कदम्बकदम्बकम् ॥ १० ॥
तस्मिन्सुरेश्वरविभूतिगताभिलाषे
राजाभवत्तदनुजः किल **मङ्गलेशः** ।
यः पूर्वपश्चिमसमुद्रतटोषिताश्व-
सेनारजःपटविनिर्मितदिग्वितानः ॥ ११ ॥
स्फुरन्मयूखैरसिदीपिकाशतै-
र्व्युदस्य मातङ्गतमिस्रसञ्चयम् ।
अवाप्तवान्यो रणरङ्गमन्दिरे
**कटच्छुरि**श्रीललनापरिग्रहम् ॥ १२ ॥
पुनरपिच जिघृक्षोस्सैन्यमाक्रान्तसालं
रुचिरबहुपताकं **रेवतीद्वीप**माशु ।
सपदि महदुदन्वत्तोयसंक्रान्तबिम्बं
वरुणबलमिवाभूदागतं यस्य वाचा ॥ १३ ॥
तस्याग्रजस्य तनये नहुषानुभावे
लक्ष्म्या किलाभिलषिते **पुलिकेशि**नाम्नि ।
सासूयमात्मनि भवन्तमतः पितृव्यं
ज्ञात्वापरुद्धचरितव्यवसायबुद्धौ ॥ १४ ॥
स यदुपचितमन्त्रोत्साहशक्तिप्रयोग-
क्षपितबलविशेषो **मङ्गलेशः** समन्तात् ।

स्वतनयगतराज्यारम्भयत्नेन सार्द्धं
निजमतनु च राज्यं जीवितं चोज्झति स्म ॥ १५ ॥
तावत्तच्छत्रभङ्गे जगदखिलमरात्यन्धकारोपरुद्धं
यस्यासह्यप्रतापद्युतिततिमिरिवाक्रान्तमासीत्प्रभातम् ।
नृत्यद्विद्युत्पताकैः प्रजविनि मरुति क्षुण्णपर्यन्तभागै-
र्गर्जद्भिर्वारिवाहैरलिकुलमलिनं व्योम यातं कदा वा ॥ १६ ॥
लब्ध्वा कालं भुवमुपगते जेतु**माप्पायिका**ख्ये
**गोविन्दे** च द्विरदनिकरैरुत्तरां भैमरथ्याः ।
यस्यानीकैर्युधि भयरसज्ञत्वमेकः प्रयात-
स्तत्रावाप्तं फलमुपकृतस्यापरेणापि सद्यः ॥ १७ ॥
**वरदा**तुङ्गतरङ्गतरङ्गविलसद्धंसावलीमेखलां
**वनवासी**मवमृद्नतःसुरपुरप्रस्पर्धिनीं सम्पदा ।
महता यस्य बलार्णवेन परितःसञ्छादितोर्वीतलं
स्थलदुर्गं जलदुर्गतामिव गतं तत्तत्क्षणे पश्यताम् ॥ १८ ॥
**गङ्गालु**पेन्द्रा व्यसनानि सप्त
हित्वा पुरोपार्जितसम्पदोऽपि ।
यस्यानुभावोपनताः सदास-
न्नासन्नसेवामृतपानशौण्डाः ॥ १९ ॥
**कोङ्कणेषु** यदादिष्टचण्डदण्डाम्बुवीचिभिः ।
उदस्तास्तरसा **मौर्य**पल्वलाम्बुसमृद्धयः ॥ २० ॥
अपरजलधेर्लक्ष्मीं यस्मिन्पुरीं पुरभित्प्रभे
मदगजघटाकारैर्नावां शतैरवमृद्नति ।
जलदपटलानीकाकीर्णन्नवोत्पलमेचकं
जलनिधिरिव व्योम व्योम्नः समोऽभवदम्बुधिः ॥ २१ ॥
प्रतापोपनता यस्य **लाटमालवगुर्जराः** ।
दण्डोपनतसामन्तचर्याचार्या इवाभवन् ॥ २२ ॥

अपारीमितविभूतिस्फीतसामन्तसेना-
  मुकुटमाणिमयूखाक्रान्तपादारविन्दः ।
युधि पतितगजेन्द्रानीकबीभत्सभूतो
  भयविगलितहर्षो येन चाकारि **हर्षः** ॥ २३ ॥

भुवमुरुभिरनीकैः शासतो यस्य **रेवा-**
  विविधपुलिनशोभावन्ध्य**विन्ध्यो**पकण्ठः ।
अधिकतरमराजत्स्वेन तेजोमहिम्ना
  शिखरिभिरिभवर्ज्यो वर्ष्मणा स्पर्द्धयेव ॥ २४ ॥

विधिवदुपचिताभिः शक्तिभिः शक्रकल्प-
  स्तिसृभिरपि गुणौघैः स्वैश्च माहाकुलाद्यैः ।
अगमदधिपतित्वं यो **महाराष्ट्रकाणां**
  नवनवतिसहस्रग्रामभाजां त्रयाणाम् ॥ २५ ॥

गृहिणां स्वगुणैस्त्रिवर्गतुङ्गा
  विहितान्यक्षितिपालमानभङ्गाः ।
अभवन्नुपजातभीतिलिङ्गा
  यदनीकेन **सकोसलाः कलिङ्गाः** ॥ २६ ॥

पिष्टं **पिष्टपुरं** येन जातं दुर्गमदुर्गमम् ।
चित्रं यस्य कलेर्वृत्तं जातं दुर्गमदुर्गमम् ॥ २७

सन्नद्धवारणघटास्थगितान्तरालं
  नानायुधक्षतनरक्षतजाङ्गरागम् ।
आसीज्जलं यदवमर्दितमभ्रगर्भं
  कौनालमम्बरमिवोर्ज्जितसान्ध्यरागम् ॥ २८ ॥

उद्धूतामलचामरध्वजशतच्छत्रान्धकारैर्बलैः
  शौर्योत्साहरसोद्धतारिमथनैर्मौलादिभिः षड्विधैः ।
आक्रान्तात्मबलोन्नतिं बलरजःसञ्छन्न**काञ्चीपुर-**
  प्राकारान्तारितप्रतापमकरोद्यः **पल्लवानां** पतिम् ॥ २९ ॥

**कावेरी** द्रुतशफरीविलोलनेत्रा
**चोलानां** सपदि जयोद्यतस्य यस्य ।
प्रश्चोतन्मदगजसेतुरुद्धनीरा
संस्पर्शं परिहरति स्म रत्नराशेः ॥ ३० ॥
**चोलकेरलपाण्ड्यानां** योऽभूत्तत्र महर्द्धये ।
**पल्लवानीकनीहार**तुहिनेतरदीधितिः ॥ ३१ ॥
उत्साहप्रभुमन्त्रशक्तिसहिते यस्मिन्समस्ता दिशो
जित्वा भूमिपतीन्विसृज्य महितानाराध्य देवद्विजान् ।
**वातापीं** नगरीं प्रविश्य नगरीमेकामिवोर्वीमिमां
चञ्चन्नीरधिनीलनीरपरिखां **सत्याश्रये** शासति ॥ ३२ ॥
त्रिंशत्सु त्रिसहस्रेषु **भारताद्दाहवा**दितः ।
सप्ताब्दशतयुक्तेषु गतेष्वब्देषु पञ्चसु ॥ ३३ ॥
पञ्चाशत्सु कलौ काले षट्सु पञ्चशतासु च ।
समासु समतीतासु **शकानामपि** भूभुजाम् ॥ ३४ ॥
तस्याम्बुधित्रयनिवारितशासनस्य
**सत्याश्रयस्य** परमाप्तवता प्रसादम् ।
शैलं जिनेन्द्रभवनं भवनं महिम्नां
निर्मापितं मतिमता **रविकीर्तिने**दम् ॥ ३५ ॥
प्रशस्तेर्वसतेश्चास्या जिनस्य त्रिजगद्गुरोः ।
कर्ता कारयिता चापि **रविकीर्तिः** कृती स्वयम् ॥ ३६ ॥
येनायोजि नवेश्मास्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां **रविकीर्तिः** कविताश्रित-
**कालिदासभारवि**कीर्तिः ॥ ३७ ॥

---

## No. 13.

## Udaipur Stone Inscription of Aparājita of V. S. 718 ( 661 A. D. )

स्पृष्टा वक्षसि लीलया कररुहैः काचित्कचाकर्षणा-
दन्या कामपरेण पादपतनैः कण्ठग्रहेणापरा ।
धन्यास्ता भुवने सुरेन्द्रतनवो याः प्रापिता निर्वृतिं
स्मृत्वेत्थं स्पृहयन्ति गोपवनिता यस्मै स पायाद्धरिः ॥ १ ॥
लक्ष्मीलीलोपधानं प्रलयजलनिधिस्थायिनो गण्डशैला
दर्पोद्वृत्तासुरेन्द्रद्रुमगहनवनच्छेददक्षाः कुठाराः ।
संसारापारवारिप्रसररयसमुत्तारणे बद्धकक्ष्या
दोर्दण्डाः पान्तु शौरेस्त्रिभुवनभवनोत्तम्भनस्तम्भभूताः ॥ २ ॥
राजा श्री **गुहिला**न्वयामलपयोराशौ स्फुरद्दीधिति-
ध्वस्तध्वान्तसमूहदुष्टसकलव्यालावलेपान्तकृत् ।
श्रीमानित्य**पराजितः** क्षितिभृतामभ्यर्चितो मूर्द्धभि-
र्वृत्तस्वच्छतयैव कौस्तुभमणिर्जातो जगद्भूषणम् ॥ ३ ॥
**शिवा**त्मजोऽखण्डितशक्तिसंप-
द्धुर्यः समाक्रान्तभुजङ्गशत्रुः ।
तेनेन्द्रवत्स्कन्द इव प्रणेता
वृतो महाराज**वराहसिंहः** ॥ ४ ॥
जनगृहीतमपि क्षयवर्जितं
धवलमप्यनुरञ्जितभूतलम् ।
स्थिरमपि प्रविकासि दिशो दश
भ्रमति यस्य यशो गुणवेष्टितम् ॥ ५ ॥
तस्य नाम दधती **यशोमती**
गेहिनी प्रणयिनी यशोमती ।
चित्तमुत्पथगतं निरुन्धती
सा बभूव विनयादरुन्धती ॥ ६ ॥

श्रीर्बन्धकी स्थाणुरता च गौरी
वैधव्यदुःखोपहता रतिश्च ।
बाला त्रिलोक्यामतुलोपमाना
सीमन्तिनीनां धुरि सैव जाता ॥ ७ ॥

विलोक्यासौ लक्ष्मीं स्वनयननिमेषप्रतिसमां
वयोवित्तं रङ्गत्तनुतरतरङ्गाङ्गतरलम् ।
तरन्संसाराब्धिं विषमविषयग्राहकलिलं
स्थिरं पोताकारं भवनमकरोत्कैटभरिपोः ॥ ८ ॥

सूचीर्विस्फोटयन्तः स्फुटितपुटरजोधूसराः केतकीना-
माधुन्वन्तः कलापान्मदकलवचसां नृत्यतां बर्हिणानाम् ।
मेघालीर्विक्षिपन्तः सलिलकणभृतो वायवः प्रावृषेण्या
वान्त्युच्चैर्यत्र तस्मिन्पुरनरकरिपोर्मन्दिरं संनिविष्टम् ॥ ९ ॥

यावद्भानोः खुराग्रव्रणितजलमुचस्तुङ्गरङ्गास्तुरङ्गा
यावत्क्रामन्ति पृथ्वीतलमतुलजला नो समुद्राः समुद्राः ।
यावन्मेरोर्नमेरुप्रसवसुरभयो भान्ति भागाः शुभागाः
शौरेर्धामास्तु तावत्कृतनियमनमद्विप्रसिद्धं प्रसिद्धम् ॥ १० ॥

दामोदरस्य पौत्रेण सूनुना ब्रह्मचारिणः ।
नाम्ना दामोदरेणैव कृता काव्यविडम्बना ॥ ११ ॥
बालेनाजितपौत्रेण स्फुटा वत्सस्य सूनुना ।
यशोभटेन पूर्वेयमुत्कीर्णा विकटाक्षरा ॥ १२ ॥
संवत्सरशतेषु समस्वष्टादशाधिकेषु ।
मार्गशीर्षशुद्धपञ्चम्यां प्रतिष्ठा वासुदेवस्य ॥ १३ ॥

नमः पुरुषोत्तमाय ।

---

## No. 14.

## Aphsaḍ Stone Inscription of Adityasena

**Not dated** ( of about the last quarter of the 7th, cent. A. D. )

आसीद्दन्तिसहस्रगाढकटको विद्याधराध्यासितः
सद्वंशः स्थिर उन्नतो गिरिरिव श्री**कृष्णगुप्तो** नृपः ।
दृप्तारातिमदान्धवारणघटाकुम्भस्थलीः क्षुन्दता
यस्यासंख्यरिपुप्रतापजयिना दोष्णा मृगेन्द्रायितम् ॥ १ ॥
सकलः कलङ्करहितः क्षततिमिरस्तोयधेः शशाङ्क इव ।
तस्मादुदपादि सुतो देवः श्री**हर्षगुप्त** इति ॥ २ ॥
यो योग्याकालहेलावनतदृढधनुर्भीमबाणौघपाती
मूर्त्तैः स्वस्वामिलक्ष्मीवसतिविमुखितैरीक्षितः सास्रुपातम् ।
घोराणामाहवानां लिखितमिव जयं श्लाघ्यमाविर्दधानो
वक्षस्युद्दामशस्त्रव्रणकठिनकिणग्रन्थिलेखाच्छलेन ॥ ३ ॥
श्री**जीवितगुप्तो**ऽभूत्क्षितीशचूडामणिः सुतस्तस्य ।
यो दृप्तवैरिनारीमुखनलिनवनैकशिशिरकरः ॥ ४ ॥
मुक्तामुक्तपयःप्रवाहशिशिरासूत्तुङ्गतालीवन-
भ्राम्यद्दन्तिकरावलूनकदलीकाण्डासु वेलास्वपि ।
श्च्योतत्स्फारतुषारनिर्झरपयःशीतेऽपि शैले स्थिता-
न्यस्योच्चैर्द्विषतो मुमोच न महाघोरः प्रतापज्वरः ॥ ५ ॥
यस्यातिमानुषं कर्म दृश्यते विस्मयाज्जनौघेन ।
अद्यापि **कोशवर्धन**तटात्प्लुतं पवनजस्येव ॥ ६ ॥
प्रख्यातशक्तिमाजिषु पुरःसरं श्री**कुमारगुप्त**मिति ।
अजनयदनेकं स नृपो हर इव शिखिवाहनं तनयम् ॥ ७ ॥
उत्सर्पद्वातहेलाचलितकदलिकावीचिमालावितानः
प्रोद्यद्धूलीजलौघभ्रमितगुरुमहामत्तमातङ्गशैलः ।

भीमः श्रीईशानवर्मक्षितिपतिशशिनः सैन्यदुग्धोदसिन्धु-
    र्लक्ष्मीसंप्राप्तिहेतुः सपदि विमथितो मन्दरीभूय येन ॥ ८ ॥
शौर्यसत्यव्रतधरो यः प्रयागगतो धने ।
अम्भसीव करीषाग्नौ मग्नः स पुष्पपूजितः ॥ ९ ॥
श्रीदामोदरगुप्तोऽभूत्तनयस्तस्य भूपतेः ।
येन दामोदरेणेव दैत्या इव हता द्विषः ॥ १० ॥
यो मौखरेः सामितिषूद्धतहूणसैन्या
    वल्गत्घटा विघटयन्नुरुवारणानाम् ।
सम्मूर्च्छितः सुरवधूर्वरयन्ममेति
* तत्पाणिपङ्कजसुखस्पर्शाद्विबुद्धः ॥ ११ ॥
गुणवद्द्विजकन्यानां नानालङ्कारयौवनवतीनाम् ।
परिणायितवान्स नृपः शतं निसृष्टाग्रहाराणाम् ॥ १२ ॥
श्रीमहासेनगुप्तोऽभूत्तस्माद्वीराग्रणीः सुतः ।
सर्ववीरसमाजेषु लेभे यो धुरि वीरताम् ॥ १३ ॥
श्रीमत्सुस्थितवर्मयुद्धविजयश्लाघापदाङ्कं मुहु-
    र्यस्याद्यापि विबुद्धकुन्दकुमुदक्षुण्णाच्छहार ⏑ तम् ।
लौहित्यस्य तटेषु शीतलतलेषूत्फुल्लनागद्रुम-
    च्छायासुप्तविबुद्धसिद्धमिथुनैः स्फीतं यशो गीयते ॥ १४ ॥
वसुदेवादिव तस्माच्छ्रीसेवनशो(?)भितचरणयुगः ।
श्रीमाधवगुप्तोऽभून्माधव इव विक्रमैकरसः ॥ १५ ॥
— — — ⏑ ⏑नुस्मृतो धुरि रणे श्लाघावतामग्रणीः
    सौजन्यस्य निधानमर्थनिचयत्यागोद्धुराणां व(?)रः ।
लक्ष्मीसत्यसरस्वतीकुलगृहं धर्मस्य सेतुर्दृढः
    पूज्यो (?) नास्ति स भूतले ⏑ ⏑ ⏑ — — — ⏑ — सद्गुणैः॥ १६

---

* The meter is faulty here; instead of two long syllables, we ought to have two short and one long.

चक्रं पाणितलेन सोऽप्युदवहत्तस्यापि शार्ङ्गं धनु-
र्नाशायासुहृदां सुखाय सुहृदां तस्याप्यसिर्नन्दकः।
प्राप्ते विद्विषतां वधे प्रतिहत्–तेनाप — — ᴗ —
— — — ᴗ ᴗ — ᴗ — ᴗ ᴗ ᴗ — — न्याः प्रणेमुर्जनाः ॥१७॥

आजौ मया विनिहता बलिनो द्विषन्तः
कृत्यं न मेऽस्त्यपरमित्यवधार्य वीरः।
श्रीहर्षदेवनिजसङ्गमवाञ्छया च
— — ᴗ — ᴗ ᴗ ᴗ — ᴗ ᴗ — ᴗ — — ॥ १८ ॥

श्रीमान्बभूव दलितारिकरीन्द्रकुम्भ-
मुक्तारजःपटलपांसुलमण्डलाग्रः।
**आदित्यसेन** इति तत्तनयः क्षितीश-
चूडामणिर्द ᴗ ऽ — ᴗ ᴗ — ᴗ — — ॥ १९ ॥

— — — ᴗ ᴗ — ᴗ मागतमरिध्वंसोत्थमाप्तं यशः
श्लाघ्यं सर्वधनुष्मतां पुर इति श्लाघां परां बिभ्रती।
आशीर्वादपरम्परा चिरसकृद् (?) — — ᴗ — — — ᴗ —
— — — ᴗ ᴗ — ᴗ — ᴗ ᴗ — — — ᴗ यामास — ॥ २० ॥

आजौ स्वेदच्छलेन ध्वजपटशिखया मार्जतो दानपङ्कं
खड्गं क्षुण्णेन मुक्ताशकलसिकति — — ᴗ — — ᴗ — —।
— — — — ᴗ — — ᴗ ᴗ ᴗ ᴗ ᴗ ᴗ — मत्तमातङ्गघातं
तद्गन्धाकृष्टसर्पद्बहलपरिमलभ्रान्तमत्तालिजालम् ॥ २१ ॥

आबद्धभीमविकटभ्रुकुटीकठोर-
सङ्ग्राम — ᴗ ᴗ ᴗ — ᴗ ᴗ — ᴗ — —।
— — ᴗ — ᴗ ᴗ ववल्लभभृत्यवर्ग-
गोष्ठीषु पेशलतया परिहासशीलः ॥ २२ ॥

सत्यभर्तृव्रता यस्य मुखोपधानतापसी।
परिहास् — ᴗ — — — — — — — — ᴗ — ᴗ — ॥ २३ ॥

– – – – ॅ – ज्ञः सकलरिपुबलध्वंसहेतुर्गरीया-
निस्त्रिंशोत्खातघातश्रमजनितजडोऽप्यूर्जितस्वप्रतापः ।
युद्धे मत्तेभकुम्भस्थल ॅ ॅ ॅ ॅ – – – ॅ – – – ॅ – –
– – श्वेतातपत्रस्थगितवसुमतीमण्डलो लोकपालः ॥ २४ ॥
आजौ मत्तगजेन्द्रकुम्भदलनस्फीतस्फुरद्दोर्युगो
ध्वस्तानेकरिपुप्रभाव ॅ ॅ – – – – यशोमण्डलः ।
न्यस्ताशेषनरेन्द्रमौलिचरणस्फारप्रतापानलो
लक्ष्मीवान्समराभिमानविमलप्रख्यातकीर्तिर्नृपः ॥ २५ ॥
येनेयं शरदिन्दुबिम्बधवला प्रख्यातभूमण्डला
लक्ष्मीसङ्गमकांक्षया सुमहती कीर्तिश्चिरं कोपिता ।
याता सागरपारमद्भुततमा सापत्न्यवैरादहो
तेनेदं भवनोत्तमं क्षितिभुजा विष्णोः कृते कारितम् ॥ २६ ॥
तज्जनन्या महादेव्या श्रीमत्या कारितो मठः ।
धार्मिकेभ्यः स्वयं दत्तः सुरलोकगृहोपमः ॥ २७ ॥
शङ्खेन्दुस्फटिकप्रभाप्रतिसमस्फारस्फुरच्छीकरं
नक्रक्रान्तिचलत्तरङ्गविलसत्पक्षिप्रनृत्यत्तिमि ।
राज्ञा खानितमद्भुतं सुतपसा पेपीयमानं जनै-
स्तस्यैव प्रियभार्यया नरपतेः श्रीकोणदेव्या सरः ॥ २८ ॥
यावच्चन्द्रकला हरस्य शिरसि श्रीः शार्ङ्गिणो वक्षसि
ब्रह्मास्ये च सरस्वती कृत ॅ – – – ॅ – – – ॅ – ।
भोगे भूर्भुजगाधिपस्य च तडिद्यावद्घनस्योदरे
तावत्कीर्तिमिहातनोति धवलामादित्यसेनो नृपः ॥ २९ ॥
सूक्ष्मशिवेन गौडेन प्रशस्तिर्विकटाक्षरा ।
– – – – मिता सम्यग्धार्मिकेण सुधीमता ॥ ३० ॥

## No. 15.

### Rāgim Copperplate Inscription of Tīvaradeva of the 7th yr. of his reign ( probably of the last quarter of the VIII cant, A. D.)

श्रीमत्तीवरदेवस्य कोसलाधिपतेरिदम् ।
शासनं धर्मवृद्ध्यर्थं स्थिरमाचन्द्रतारकम् ॥ १ ॥
जयति जगत्त्रयतिलकः क्षितिभृत्कुलभवनमङ्गलसूत्रः ।
श्रीमत्तीवरदेवो धौरेयः सकलपुण्यकृताम् ॥ २ ॥

स्वस्ति श्रीपुरात्समाधिगतपञ्चमहाशब्दानेकनतनृपतिकिरीटकोटि-धृष्टचरणनखदर्पणोद्भासितोऽपि कण्ठदुन्मुखप्रकटरिपुराजलक्ष्मीकेशपाशा-कर्षणदुर्ललितपाणिपल्लवो निशितनिस्त्रिंशघनघातपातितारिद्विरदकुम्भम-ण्डलगलद्बहलशोणितसदासिक्तमुक्ताफलप्रकरमण्डितरणाङ्गणाविविध-रत्नसम्भारलाभलोभविजृम्भमाणारिक्षारवारिवाडवानलश्चन्द्रोदय इवाकृ-तकरोद्वेगः, क्षीरोद इवाविर्भूतानेकातिशायिरत्नसम्पत्, गरुत्मानिव भुजङ्गोद्धारचतुरः; परामृष्टशत्रुकलत्रनेत्राञ्जनकोमलकपोलकुङ्कुमपत्रभ-ङ्गुत्, शिष्टाचारव्यवस्थापरिपालनैकदत्तचित्तः। अपि च प्राक्तने तपसि यशसि रहसि चेतसि चक्षुषि वपुषि च पूजितो जनेनाक्लिष्टतया नितान्तमवितृप्तो गूढो गाढस्वच्छप्रसन्नवदनेन चालङ्कृतः स्वामिभवने-ऽप्यबहुलपनोऽनुज्झितः कुतृष्णोऽपि नितान्तत्यागी, रिपुजनप्रचण्डोऽपि सौम्यदर्शनो भूतिविभूषणोऽप्यपरुषः स्वभावतः किञ्चासन्तुष्टो धर्मार्जनेन सम्पल्लाभे स्वल्पक्रोधेन प्रभावे, लुब्धो यशसि न परवित्तापहारे, शक्तः सुभाषितेषु न कामिनीक्रीडासु, प्रतापानलदग्धाशेषरिपुकुलतूलराशिस्तु-हिनाशिलाशैलधवलयशोराशिप्रकाशितादिगन्तः कान्तः प्रकृत्या श्रीमदि-न्द्रबलसूनोरलङ्कृतपाण्डुवंशस्य श्रीनन्नदेवस्य तनयंप्राप्तः स्वपु-ण्यसम्भारप्रशमिताशेषजगदुपद्रवः स्वप्रज्ञाशुचिसमुद्धृताखिलकण्टकः परमवैष्णवो मातापितृपादानुध्यातः श्रीमहाशिवतीवरराजः कुशली

**पेण्ठामभुक्तीयपिम्परिपद्रके** ब्राह्मणान्संपूज्य प्रतिवासिनः समाज्ञापयति—

विदितमस्तु भवतां यथास्माभिरयं ग्रामो यावद्रविशशितारा-किरणप्रतिहतघोरान्धकारं जगदवतिष्ठते तावदुपभोग्यः सनिधिः सोपनिधिरचाटभटप्रवेशो दारद्रणकसर्वकरादानसमेतो मातापित्रोरात्मनश्च पुण्याभिवृद्धये भारद्वाजसगोत्रवाजसनेयमाध्यन्दिनभट्टगौरीदत्तपुत्रभट्टभवदत्तभट्टहरदत्ताभ्यां ज्येष्ठद्वादश्यामुदकपूर्वं प्रतिपादित इत्यवगम्य भवद्भिर्यथोचितमाभ्यां भोगभागमुपनयद्भिः सुखं प्रतिवस्तव्यमिति भाविनश्च भूमिपालानुद्दिश्येदमभिधीयते ।

भूमिप्रदा दिवि ललन्ति पतन्ति हन्त
 हृत्वा महीं नृपतयो नरके नृशंसाः ।
एतद्द्वयं परिकलय्य चलां च लक्ष्मी-
 मायुस्तथा कुरुत यद्भवतामभीष्टम् ॥ १ ॥

रक्षापालनयोस्तावत्फलं सुगति दुर्गति ।
को नाम स्वर्गमुत्सृज्य नरकं प्रतिपद्यते ॥ २ ॥

अग्नेरपत्यं प्रथमं सुवर्णं
 भूर्वैष्णवी सूर्यसुताश्च गावः ।
दत्तास्त्रयस्तेन भवन्ति लोका
 यः काञ्चनं गां च महीं च दद्यात् ॥ ३ ॥

प्रवर्धमानविजयराज्यसंवत्सरे ७ कार्तिकदिवसेऽष्टमे ८ ।

# ERRATA.

| Page. | Line. | Incorrect. | Correct. |
|---|---|---|---|
| ३ | १८ | महानद्या° | महान्नाद्या° |
| ४ | ३ | ३५० | ३६० |
| ७ | ८ | शश्वरच्छ्री° | शश्वच्छ्री° |
| १० | १४ | – – ⏑ | [ पितेव ] |
| १२ | २५ | शोभा | शोभ |
| १५ | १७ | निष्ठितैः | निष्ठिताः |
| २१ | १३ | फणि | फण |
| २२ | ८ | मेध्यं | मेद्यं |
| २२ | १३ | °रेणुरजसा | °रेण रजसा |
| २३ | २१ | देशान् | देशं |
| २६ | १० | मेधा | मेघा |
| २७ | २० | तिमिराः | तिमिरः |
| २९ | ५ | प्रणचता | प्रणता |
| ३० | १० | विक्रभो | विक्रमो |
| ३९ | ११ | रङ्गत | तरङ्ग |
| ३९ | १९ | चण्डद्रण्डा | चण्डदण्डा |
| ३९ | २१ | पुरीं | पुरीं |
| ३९ | २५ | गुर्जराः | गूर्जराः |